1.1










भवतः नाम किम् ? Bhavataḥ nāma kim ? ______________________ ।

भवत्याः नाम किम् ? Bhavatyāḥ nāma kim ? ______________________ ।

## 1.2 अ उदाहरणं दृष्ट्वा तादृशवाक्यानि लिखतु - (Udāharaṇaṁ dṛṣṭvā tādṛśavākyāni likhatu)


बालकः
Bālakaḥ


१. एषः बालकः ।
Eṣaḥ bālakaḥ

१. सः वृद्धः ।
Saḥ Vṛddhaḥ


वृद्धः
Vṛddhaḥ


गणेशः
Gaṇeśaḥ

२. —— ——— ।

२. —— ——— ।


गोविन्दः
Govindaḥ


आरक्षकः
Ārakṣakaḥ

३. —— ——— ।

३. —— ——— ।


सैनिकः
Sainikaḥ

## 1.2 आ


सीता
Sītā


१. एषा सीता ।
Eṣā Sītā

१. सा सन्ध्या ।
Sā Sandhyā


सन्ध्या
Sandhyā


बालिका
Bālikā

२. —— ——— ।

२. —— ——— ।


वृद्धा
Vṛddhā


नलिनी
Nalinī

३. —— ——— ।

३. —— ——— ।


सावित्री
Sāvitrī


पुस्तकम्
Pustakam



१. एतत् पुस्तकम् ।
Etat Pustakam.

१. तत् गृहम् ।
Tat Gṛham.


गृहम्
Gṛham


छत्रम्
Chatram

२. ___ ______ ।

२. ___ ______ ।


फलम्
Phalam


पुष्पम्
Puṣpam

३. ___ ______ ।

३. ___ ______ ।


कृष्णफलकम्
Kṛṣṇaphalakam


उपनेत्रम्
Upanetram

४. ___ ______ ।

४. ___ ______ ।


दूरदर्शनम्
Dūradarśanam

| | | | | |
|---|---|---|---|---|
| एषः | Eṣaḥ | - | सः | Saḥ |
| एषा | Eṣā | - | सा | Sā |
| एतत् | Etat | - | तत् | Tat |

| | | |
|---|---|---|
| कः | Kaḥ | ? |
| का | Kā | |
| किम् | Kim | |

**1.2 ई**



उदाहरणं दृष्ट्वा वाक्यानि लिखतु – *Udāharaṇam dṛṣṭvā vākyāni likhatu*

१. सा बालिका वा ? Sā bālikā vā ? — आम्, सा बालिका । Ām, sā bālikā.

२. —— बालकः वा ? bālakaḥ vā ? — ______ ____ ______ ।

३. —— द्वारं dwāram —— ? — ______ ____ ______ ।

४. —— सैनिकः sainikaḥ —— ? — न, ______ ________ ।

५. —— युवतिः yuvatiḥ —— ? — ______ ____ ______ ।

६. —— चित्रं citram —— ? — ______ ____ ______ ।

**1.2 उ**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| निर्मला | Nirmalā | बालिका | bālikā | ✓ | युवतिः | yuvatiḥ | ✗ |
| रोहिणी | Rohiṇī | वैद्या | vaidyā | ✗ | विद्यार्थिनी | vidyārthinī | ✓ |
| महेशः | Maheśaḥ | विद्यार्थी | vidyārthī | ✓ | वैद्यः | vaidyaḥ | ✗ |
| अनन्तः | Anantaḥ | शिक्षकः | shikṣakaḥ | ✓ | लिपिकारः | lipikāraḥ | ✗ |
| देवदत्तः | Devadattaḥ | न्यायवादी | nyāyavādī | ✗ | टङ्ककः | ṭaṅkakaḥ | ✓ |
| नागराजः | Nāgarājaḥ | चित्रकारः | citrakāraḥ | ✗ | आरक्षकः | ārakṣakaḥ | ✓ |

एतस्य कोष्ठकस्य साहाय्येन वाक्यानि लिखतु – *Etasya koṣṭhakasya sāhāyyena vākyāni likhatu*

१. निर्मला बालिका वा ? — आम्, निर्मला बालिका । — सा युवतिः न ।
Nirmalā bālikā vā ? — Ām, Nirmalā bālikā. — Sā yuvatiḥ na.

२. रोहिणी वैद्या वा ? — न, रोहिणी वैद्या न । — सा विद्यार्थिनी ।
Rohiṇī vaidyā vā ? — Na, Rohiṇī vaidyā na. — Sā vidyārthinī.

३. ________________ ? ________________ । ________________ ।

४. ________________ ? ________________ । ________________ ।

५. ________________ ? ________________ । ________________ ।

६. ________________ ? ________________ । ________________ ।

| | | | | | |
|---|---|---|---|---|---|
| रामः | Rāmaḥ | सीता | Sītā | पुस्तकम् | pustakam |
| ग्रन्थः | granthaḥ | घटी | ghaṭī | पुष्पम् | puṣpam |
| श्लोकः | ślokaḥ | बालिका | bālikā | वस्त्रम् | vastram |
| दर्पणः | darpaṇaḥ | लता | latā | गृहम् | gṛham |
| विद्युद्दीपः | vidyuddīpaḥ | सञ्चिका | sañcikā | चित्रम् | citram |
| गजः | gajaḥ | लेखनी | lekhanī | पत्रम् | patram |

**रिक्तस्थलानि सः / सा / तत् एतेषु उचितरूपेण पूरयतु** – *Riktasthalāni **saḥ** / **sā** / **tat** eteṣu uchitarūpeṇa pūrayatu.*

- पुंलिङ्गशब्दतः पूर्वं 'सः' इत्येव लेखनीयम् । *Pulliṅgaśabdataḥ pūrvaṃ 'saḥ' ityeva lekhanīyam.*
- स्त्रीलिङ्गशब्दतः पूर्वं 'सा' इत्येव लेखनीयम् । *Strīliṅgaśabdataḥ pūrvaṃ 'sā' ityeva lekhanīyam.*
- नपुंसकलिङ्गशब्दतः पूर्वं 'तत्' इत्येव लेखनीयम् । *Napuṃsakaliṅgaśabdataḥ pūrvaṃ 'tat' ityeva lekhanīyam.*

**1.2 क**

| | | |
|---|---|---|
| सः रामः । Saḥ Rāmaḥ | सा सीता । Sā Sītā | तत् पुस्तकम् । Tat pustakam |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ । | ___ ______ । | ___ ______ । |

**रिक्तस्थलानि एषः / एषा / एतत् / कः / का / किम् ? एतेषु उचितरूपेण पूरयतु**
*Riktasthalāni **eṣaḥ** / **eṣā** / **etat** / **kaḥ** / **kā** / **kim** ? eteṣu uchitarūpeṇa pūrayatu.*

**1.2 ख**

| | | |
|---|---|---|
| कः रामः ? Kaḥ Rāmaḥ ? | का सीता ? Kā Sītā ? | किं पुस्तकम् ? Kim pustakam ? |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ ? | ___ ______ ? | ___ ______ ? |
| ___ ______ । | ___ ______ । | ___ ______ । |
| ___ ______ ? | ___ ______ ? | ___ ______ ? |

1.3

# नित्योपयोगीनि वस्तूनि Nityopayogīni vastūni


दर्पणः
darpaṇaḥ


मञ्चः
mañcaḥ


विद्युद्दीपः
vidyuddīpaḥ


करदीपः
karadīpaḥ


मण्डपः
maṇḍapaḥ


पादत्राणम्
pādatrāṇam


कङ्कतम्
kaṅkatam


भावचित्रम्
bhāvacitram


सीवनयन्त्रम्
sīvanayantram


वातायनम्
vātāyanam


जवनिका
javanikā


यानपेटिका
yānapeṭikā


निधानिका
nidhānikā


द्विचक्रिका
dvicakrikā


पाञ्चालिका
pāñcālikā


मापिका
māpikā


माला
mālā


पुष्पधानी
puṣpadhānī


दूरवाणी
dūravāṇī


कर्तरी
kartarī

### 1.4



चित्रं दृष्ट्वा 'अस्ति' अथवा 'नास्ति' इति लिखतु – *Citraṃ dṛṣṭvā* '**asti**' *athavā* '**nāsti**' *iti likhatu.*

पुस्तकम् अस्ति । Pustakam asti.
घटी Ghaṭī ———— ।
उपनेत्रम् Upanetram ———— ।
लेखनी Lekhanī ———— ।
दूरवाणी Dūravāṇī ———— ।

विद्युद्दीपः नास्ति । Vidyuddīpaḥ nāsti.
पुष्पं Puṣpam ———— ।
सङ्गणकम् Saṅgaṇakam ———— ।
चषकः Caṣakaḥ ———— ।
पत्रिका Patrikā ———— ।

### 1.5

उदाहरणं दृष्ट्वा चित्रस्य अधः स्थितं रिक्तं स्थानं पूरयतु – *Udāharaṇaṃ dṛṣṭvā citrasya adhaḥ sthitaṃ riktaṃ sthānaṃ pūrayatu.*



सस्यम् अत्र अस्ति । Sasyam atra asti.



वृक्षः तत्र अस्ति । Vṛkṣaḥ tatra asti.



कारयानं Kāryānam ——— अस्ति । asti.



देवालयः Devālayaḥ ——— अस्ति । asti.

**1.6 अ**

वायुः सर्वत्र अस्ति । Vāyuḥ sarvatra asti.

देवः Devaḥ ____________ अस्ति । asti.

**सर्वत्र Sarvatra**

मम मित्रम् अन्यत्र अस्ति । Mama mitram anyatra asti.

तस्य गृहम् Tasya gṛham ____________ अस्ति । asti.

**अन्यत्र Anyatra**

**1.6 आ**

| | | |
|---|---|---|
| पुस्तकम् Pustakam<br>गृहम् Gṛham | अत्र Atra<br>तत्र Tatra<br>कुत्र Kutra<br>सर्वत्र Sarvatra<br>अन्यत्र Anyatra<br>एकत्र Ekatra | अस्ति Asti<br>नास्ति Nāsti |

एतस्य कोष्ठकस्य आधारेण वाक्यानि लिखतु *Etasya koṣṭhakasya ādhāreṇa vākyāni likhatu*

१. पुस्तकम् अत्र अस्ति । Pustakam atra asti.

२. ______ ______ ______ ।

३. ______ ______ ______ ।

४. ______ ______ ______ ।

५. ______ ______ ______ ।

६. ______ ______ ______ ।

७. ______ ______ ______ ।

८. ______ ______ ______ ।

९. ______ ______ ______ ।

१०. ______ ______ ______ ।

११. ______ ______ ______ ।

१२. ______ ______ ______ ।

1.7




**भवान् कः ? Bhavān Kaḥ ?**







**भवती का ? Bhavatī Kā ?**







एतस्य उत्तरं लिखतु - *Etasya uttaraṃ likhatu*

भवान् कः ? Bhavān kaḥ ? ———— ———— ।

भवती का ? Bhavatī kā ? ———— ———— ।

**अहं** Aham, **भवान्** Bhavān, **भवती** Bhavatī

## 1.8 अ

उदाहरणं दृष्ट्वा तादृशवाक्यानि लिखतु – Udāharaṇaṃ dṛṣṭvā tādṛśavākyāni likhatu.



रामः Rāmaḥ



१. एतस्य नाम रामः ।
Etasya nāma Rāmaḥ



कृष्णः Kṛṣṇaḥ

१. तस्य नाम कृष्णः ।
Tasya nāma Kṛṣṇaḥ



गणेशः Gaṇeśaḥ

२. ________________ ।



आञ्जनेयः Āñjaneyaḥ

२. ________________ ।



शिवः Śivaḥ

३. ________________ ।



बुद्धः Buddhaḥ

३. ________________ ।



रामायणम् Rāmāyaṇam

४. ________________ ।



महाभारतम् Mahābhāratam

४. ________________ ।

## 1.8 आ



उमा Umā

१. एतस्याः नाम उमा ।
Etasyāḥ nāma Umā



गीता Gītā

१. तस्याः नाम गीता ।
Tasyāḥ nāma Gītā

२. ________________ ।

२. ________________ ।



लीला Līlā



रमा Ramā

३. ________________ ।

३. ________________ ।



लक्ष्मीः Lakṣmīḥ



सरस्वती Sarasvatī

४. ________________ ।

४. ________________ ।

## 1.9 अ

आवरणे विद्यमानस्य पदस्य उचितं रूपं रिक्ते स्थले लिखतु – *Avarane vidyamānasya padasya ucitam rupam rikte sthale likhatu.*

यथा - (सरयूनदी Sarayūnadī) सरयूनद्याः तीरे अयोध्या अस्ति । Sarayūnadyāḥ tīre Ayodhyā asti.

(अयोध्या Ayodhyā) __________ राजा दशरथः । rājā Daśarathaḥ.

(दशरथः Daśarathaḥ) __________ चत्वारः पुत्राः । catvāraḥ putrāḥ.

(प्रथमः Prathamaḥ) __________ नाम रामः । nāma Rāmaḥ.

(द्वितीयः Dwitīyaḥ) __________ नाम भरतः । nāma Bharataḥ.

(तृतीयः Tritīyaḥ) __________ (चतुर्थः caturthaḥ) __________ च नाम लक्ष्मणः शत्रुघ्नः च । ca nāma Lakṣmaṇaḥ Śatrughnaḥ ca.

रामः Rāmaḥ (कौसल्या Kousalyā) __________ पुत्रः । putraḥ.

भरतः Bharataḥ (कैकेयी Kaikeyī) __________ पुत्रः । putraḥ.

(लक्ष्मणः Lakṣmaṇaḥ) __________ (शत्रुघ्नः Śatrughnaḥ) __________ च माता सुमित्रा । ca mātā Sumitrā.

रामः Rāmaḥ (रावणः Rāvaṇaḥ) __________ (कुम्भकर्णः Kumbhakarṇaḥ) __________ च वधं कृतवान् । ca vadham kṛtavān.

## 1.9 आ

(मथुरा Mathurā) __________ राजा उग्रसेनः । rājā Ugrasenaḥ.

(उग्रसेनः Ugrasenaḥ) __________ पुत्रः कंसः । putraḥ Kamsaḥ.

(कंसः Kamsaḥ) __________ भगिनी देवकी । bhaginī Devakī.

(देवकी Devakī) __________ पतिः वसुदेवः, पुत्रः कृष्णः । patiḥ Vasudevaḥ, putraḥ Kṛṣṇaḥ.

कृष्णः Kṛṣṇaḥ (नन्दगोपः Nandagopaḥ) __________ (यशोदा Yaśodā) __________ च पालितपुत्रः अपि । ca pālitaputraḥ api.

(कुन्ती Kuntī) __________ पुत्रः अर्जुनः । putraḥ Arjunaḥ.

सः अर्जुनः Saḥ Arjunaḥ (कृष्णः Kṛṣṇaḥ) __________ (भगिनी bhaginī) __________ (सुभद्रा Subhadrā) __________ पतिः । patiḥ.

(सुभद्रा Subhadrā) __________ पुत्रः अभिमन्युः । putraḥ Abhimanyuḥ.

अभिमन्युः Abhimanyuḥ (उत्तरा Uttarā) __________ पतिः । patiḥ.

2.1 अ

## क्रियापदानि Kriyāpadāni



१. सा गच्छति । Sā gacchati.

२. सः आगच्छति । Saḥ āgacchati.

३. सः पठति । Saḥ paṭhati.

४. सः लिखति । Saḥ likhati.

५. सः क्रीडति । Saḥ krīḍati.

६. सः पिबति । Saḥ pibati.

७. सः खादति । Saḥ khādati.

८. सा पश्यति । Sā paśyati.

९. सः हसति । Saḥ hasati.

१०. सः नयति । Saḥ nayati.

2.1 आ

एवमेव एषः, एषा, एतत्, सः, सा, तत्, भवान्, भवती - एतैः शब्दैः सह क्रियापदानाम् अभ्यासं करोतु । यथा - एषः गच्छति, एषा गच्छति ...... । *Evameva eṣaḥ, eṣā, etat, saḥ, sā, tat, bhavān, bhavatī - etaiḥ śabdaiḥ saha kriyāpadānām abhyāsaṁ karotu. Yathā - Eṣaḥ gacchati, Eṣā gacchati.*

2.2



उदाहरणं दृष्ट्वा तानि क्रियापदानि परिवर्तयतु - *Udāharaṇam dṛṣṭvā tāni kriyāpadāni parivartayatu.*

उदा - गच्छति - १. अहं गच्छामि । २. ____ ________ ।
gacchati - Aham gacchāmi.

३. ____ ________ । ४. ____ ________ ।
५. ____ ________ । ६. ____ ________ ।
७. ____ ________ । ८. ____ ________ ।
९. ____ ________ । १०. ____ ________ ।

## 2.3 अ

एतत् सम्भाषणं पठतु - *Etat sambhāṣaṇam paṭhatu*



वितारकः - भोः, किम् **आवश्यकम्** ?
Vitārakaḥ: Bhoḥ, kim āvaśyakam ?

ग्राहकः - काफी **आवश्यकम्** ।
Grāhakaḥ: Kāphī āvaśyakam.

वितारकः - जलम् **आवश्यकं** किम् ?
Jalam āvaśyakam kim ?

ग्राहकः - **मास्तु** । काफी **आवश्यकम्** ।
Māstu. kāphī āvaśyakam.

वितारकः - स्वीकरोतु । Svīkarotu.

ग्राहकः - किञ्चित् शर्करा ...... । Kiñcit śarkarā ...

वितारकः - स्वीकरोतु । पुनः **आवश्यकं** वा ? Svīkarotu. Punaḥ āvaśyakam vā ?

ग्राहकः - **पर्याप्तम्** । पुनः **मास्तु** । Paryāptam. Punaḥ māstu.

**आवश्यकम्** Āvaśyakam **मास्तु** Māstu

**पर्याप्तम्** Paryāptam

## 2.3 आ



एतत् चित्रं पश्यतु । चित्रस्य आधारेण एकं सम्भाषणं लिखतु - Etat citram paśyatu. Citrasya ādhāreṇa ekam sambhāṣaṇam likhatu

(सम्भाषणे एते शब्दाः भवन्तु - Sambhāṣaṇe ete śabdāḥ bhavantu शाटिका, चोलः, युतकम्, ऊरुकम् Śāṭikā, colaḥ, yutakam, Ūrukam)

पत्नी Patnī - ______________________
______________________ ।

विक्रेता Vikretā - ______________________ ।

पतिः Patiḥ - ______________________ ।

विक्रेता ______________________ ।

पतिः ______________________ ।

विक्रेता ______________________ ।

पत्नी ______________________ ।

विक्रेता ______________________ ।

पतिः ______________________ ।

## 2.4 अ






एतेषां क्रियापदानां प्रार्थनारूपाणि / आज्ञारूपाणि लिखतु - *Etesām kriyāpadānām prārthanārūpāṇi / ājñārūpāṇi likhatu.*

यथा - गच्छति - गच्छतु । Gacchati - Gacchatu.

आगच्छति - ______ । āgacchati

पठति Paṭhati - ______ । लिखति Likhati - ______ ।

क्रीडति Krīḍati - ______ । पिबति Pibati - ______ ।

खादति Khādati - ______ । नयति Nayati - ______ ।

हसति Hasati - ______ । पश्यति Paśyati - ______ ।

मिलति Milati - ______ । तिष्ठति Tiṣṭhati - ______ ।

करोति Karoti - ______ । भवति Bhavati - ______ ।

**2.4 आ**

एषः, एषा, सः, सा, एतत्, तत्, भवान्, भवती - एतैः सह एतेषाम् उपयोगं करोतु । *Eṣaḥ, eṣā, saḥ, sā, etat, tat, bhavān, bhavatī - etaiḥ saha eteṣām upayogaṃ karotu.*

यथा - एषः गच्छतु । Eṣaḥ gacchatu. एषा पठतु । Eṣā paṭhatu.

______ लिखतु । likhatu. तत् ______ । Tat

______ खादतु । khādatu. ______ ______ ।

______ ______ । ______ ______ ।

______ ______ । ______ ______ ।

**3.1**

## सङ्ख्याः Saṅkhyāḥ

| | | | | |
|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ |
| एकम् Ekam | द्वे Dve | त्रीणि Trīṇi | चत्वारि Catvāri | पञ्च Pañca |
| ६ | ७ | ८ | ९ | १० |
| षट् Ṣaṭ | सप्त Sapta | अष्ट Aṣṭa | नव Nava | दश Daśa |

एताः सङ्ख्याः उच्चैः पठतु – *Etāḥ saṁkhyāḥ uccaiḥ paṭhatu.*

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ११ | एकादश | Ekādaśa | २१ | एकविंशतिः | Ekaviṁśatiḥ | ३१ | एकत्रिंशत् | Ekatriṁśat |
| १२ | द्वादश | Dvādaśa | २२ | द्वाविंशतिः | Dvāviṁśatiḥ | ३२ | द्वात्रिंशत् | Dvātriṁśat |
| १३ | त्रयोदश | Trayodaśa | २३ | त्रयोविंशतिः | Trayoviṁśatiḥ | ३३ | त्रयस्त्रिंशत् | Trayastriṁśat |
| १४ | चतुर्दश | Caturdaśa | २४ | चतुर्विंशतिः | Caturviṁśatiḥ | ३४ | चतुस्त्रिंशत् | Catustriṁśat |
| १५ | पञ्चदश | Pañcadaśa | २५ | पञ्चविंशतिः | Pañcaviṁśatiḥ | ३५ | पञ्चत्रिंशत् | Pañcatriṁśat |
| १६ | षोडश | Ṣoḍaśa | २६ | षड्विंशतिः | Ṣaḍviṁśatiḥ | ३६ | षट्त्रिंशत् | Ṣaṭtriṁśat |
| १७ | सप्तदश | Saptadaśa | २७ | सप्तविंशतिः | Saptaviṁśatiḥ | ३७ | सप्तत्रिंशत् | Saptatriṁśat |
| १८ | अष्टादश | Aṣṭādaśa | २८ | अष्टाविंशतिः | Aṣṭāviṁśatiḥ | ३८ | अष्टात्रिंशत् | Aṣṭātriṁśat |
| १९ | नवदश | Navadaśa | २९ | नवविंशतिः | Navaviṁśatiḥ | ३९ | नवत्रिंशत् | Navatriṁśat |
| २० | विंशतिः | Viṁśatiḥ | ३० | त्रिंशत् | Triṁśat | ४० | चत्वारिंशत् | Catvāriṁśat |

## 3.2

अधः एकं चित्रम् अस्ति । तत्र क्रमेण सङ्ख्याः योजयित्वा कः प्राणी अस्ति इति जानातु – *Adhaḥ ekaṁ citram asti. Tatra krameṇa saṁkhyāḥ yojayitvā kaḥ prāṇī asti iti jānātu.*



# समयः Samayah



पञ्चवादनम्
Pañcavādanam



सपादषड्वादनम्
Sapādaṣaḍvādanam



सार्धसप्तवादनम्
Sārdhasaptavādanam



पादोन-नववादनम्
Pādona-navavādanam



दशाधिक-नववादनम्
Daśādhika-navavādanam



पञ्चन्यून-दशवादनम्
Pañcanyūna-daśavādanam

### समयम् अक्षरैः लिखतु - *Samayam akṣaraiḥ likhatu*

यथा - 8.15 सपाद-अष्टवादनम् ।
Sapāda-aṣṭavādanam.

9.10 ——— ——— ।

11.20 ——— ——— ।

10.35 ——— ——— ।

12.40 ——— ——— ।

10.45 ——— ——— ।

### घट्यां समयं दर्शयतु - *Ghaṭyāṃ samayaṃ darśayatu*

यथा - 6.05



5.45



12.25



3.50



9.30



4.10



**विशेषसूचना - (*Viśeṣasūcanā*)**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1.00 | - | एकं वादनम् | Ekam vādanam | × | एकवादनम् | Ekavādanam | ✓ |
| 2.00 | - | द्वे वादनम् | Dve vādanam | × | द्विवादनम् | Dvivādanam | ✓ |
| 3.00 | - | त्रीणि वादनम् | Trīṇi vādanam | × | त्रिवादनम् | Trivādanam | ✓ |
| 4.00 | - | चत्वारि वादनम् | Catvari vādanam | × | चतुर्वादनम् | Caturvādanam | ✓ |

4.1

## पाकशालासम्बन्धीनि वस्तूनि Pākaśālāsambandhīni vastūni


चषकः
Caṣakaḥ


चमसः
Camasaḥ


घटः
Ghaṭaḥ


मन्थानः
Manthānaḥ


करण्डकः
Karaṇḍakaḥ


पात्रम्
Pātram


मिश्रकम्
Miśrakam


पेषकम्
Peṣakam


स्थालिका
Sthālikā


छुरिका
Churikā


अग्निपेटिका
Agnipeṭikā


सिक्थवर्तिका
Sikthavartikā


आधानिका
Ādhānikā


अनिलचुल्लिः
Anilaculliḥ


द्रोणी
Droṇī


दर्वी
Darvī


बाष्पस्थाली
Bāṣpasthālī


कूपी
Kūpī


वेल्लनी
Vellanī


चषकाधानी
Caṣakādhānī

4.2 अ

# बहुवचनम् Bahuvacanam

*रिक्तेषु स्थलेषु बहुवचनरूपाणि लिखतु – Riktesu sthalesu bahuvacanarupāṇi likhatu*

| एकवचनम् Ekavacanam | बहुवचनम् Bahuvacanam | एकवचनम् Ekavacanam | बहुवचनम् Bahuvacanam |
|---|---|---|---|
| बालकः Bālakaḥ | बालकाः (पु) Bālakāḥ | फलम् Phalam | फलानि (न) Phalani |
| शिक्षकः Śikṣakaḥ | शिक्षकाः Śikṣakāḥ | वनम् Vanam | वनानि Vanāni |
| चषकः Caṣakaḥ | ------- | फेनकम् Phenakam | ------- |
| घटः Ghaṭaḥ | ------- | गृहम् Gṛham | ------- |
| चमसः Camasaḥ | ------- | वस्त्रम् Vastram | ------- |
| बालिका Bālikā | बालिकाः (स्त्री) Bālikāḥ | लेखनी Lekhanī | लेखन्यः (स्त्री) Lekhanyaḥ |
| छुरिका Churikā | छुरिकाः Churikāḥ | अङ्कनी Aṅkanī | अङ्कन्यः Aṅkanyaḥ |
| स्थालिका Sthālikā | ------- | सम्मार्जनी Sammārjanī | ------- |
| अग्निपेटिका Agnipeṭikā | ------- | द्रोणी Droṇī | ------- |
| सिक्थवर्तिका Sikthavartikā | ------- | कूपी Kūpī | ------- |

4.2 आ

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| सः | Saḥ | ते | Te | एषः | Eṣaḥ | एते | Ete | कः | Kaḥ | के | Ke |
| सा | Sā | ताः | Tāḥ | एषा | Eṣā | एताः | Etāḥ | का | Kā | काः | Kāḥ |
| तद् | Tat | तानि | Tāni | एतद् | Etat | एतानि | Etāni | किम् | Kim | कानि | Kāni |

पूर्वतनकोष्ठकस्य साहाय्येन रिक्तस्थलानि पूरयतु । *Pūrvatanakoṣṭhakasya sāhāyyena riktasthalāni pūrayatu.*

उदा -

| | | | |
|---|---|---|---|
| एते Ete बालकाः । | Bālakāḥ | एताः Etāḥ द्रोण्यः । | Droṇyaḥ |
| ------ चषकाः । | Caṣakāḥ | ------ अग्निपेटिकाः । | Agnipeṭikāḥ |
| ------ पुस्तकानि । | Pustakāni | ------ घटाः । | Ghaṭāḥ |
| ------ स्थालिकाः । | Sthālikāḥ | ------ सम्मार्जन्यः । | Sammārjanyaḥ |
| ------ बाष्पस्थाल्यः ? | Bāṣpasthālyaḥ ? | ------ वस्त्राणि ? | Vastrāṇi ? |

**4.2 इ**

बहुवचनरूपाणि लिखतु - *Bahuvacanarūpāṇi likhatu.*

| | | | | |
|---|---|---|---|---|
| उदा - | एषः जनः । Eṣaḥ janaḥ. | एते जनाः । Ete janāḥ. | कः जनः ? Kaḥ janaḥ ? | --- ------ ? |
| | एषा महिला । Eṣā mahilā. | --- ------ । | सा स्थालिका । Sā Sthālikā. | --- ------ । |
| | तत् उपनेत्रम् । Tat upanetram. | --- ------ । | सः चमसः । Saḥ camasaḥ. | --- ------ । |
| | किं फलम् ? Kiṁ phalaṁ ? | --- ------ ? | का भगिनी ? Kā bhaginī ? | --- ------ ? |
| | एतत् गृहम् । Etat gṛham. | --- ------ । | एषः सैनिकः । Eṣaḥ sainikaḥ. | --- ------ । |

**4.2 ई**

| एकवचनम् *Ekavacanam* | बहुवचनम् *Bahuvacanam* |
|---|---|
| भवान् Bhavān. | भवन्तः Bhavantaḥ. |
| भवती Bhavatī. | भवत्यः Bhavatyaḥ. |
| अहम् Aham | वयम् Vayam |

| | |
|---|---|
| भवान् बालकः । Bhavān bālakaḥ. | भवन्तः बालकाः । Bhavantaḥ bālakāḥ. |
| ------ बालिका । ...... bālikā. | ------ बालिकाः । ...... bālikāḥ. |
| ------ युवकः । ...... yuvakaḥ. | ------ युवकाः । ...... yuvakāḥ. |
| ------ महिला । ...... mahilā. | ------ महिलाः । ...... mahilāḥ. |

**4.2 ङ**

प्रयोगपरिवर्तनं करोतु - *Prayogaparivartanam karotu* -

यथा -

| | | |
|---|---|---|
| १) | भवान् बालकः । <br> Bhavān bālakaḥ. | अहं बालकः । <br> Aham bālakaḥ. |
| २) | भवती अध्यापिका । <br> Bhavatī adhyāpikā. | ----- ----------- । |
| ३) | भवन्तः शिक्षकाः । <br> Bhavantaḥ śikṣakāḥ. | वयं शिक्षकाः । <br> Vayam śikṣakāḥ. |
| ४) | भवत्यः विद्यार्थिन्यः । <br> Bhavatyaḥ vidyārthinyaḥ. | ----- ----------- । |

**4.2 ऊ**

प्रश्नान् लिखतु - *Praśnān likhatu.*

यथा -

| | | |
|---|---|---|
| एते छात्राः । | Ete chātrāḥ. | एते के ? Ete ke ? |
| एताः स्थालिकाः । | Etāḥ sthālikāḥ. | ----- ---------- ? |
| वयं सचिवाः । | Vayam sacivāḥ. | ----- ---------- ? |
| एतानि चित्राणि । | Etāni citrāṇi. | ----- ---------- ? |
| ताः पत्रिकाः । | Tāḥ patrikāḥ. | ----- ---------- ? |
| वयं शिक्षिकाः । | Vayam śikṣikāḥ. | ----- ---------- ? |
| ते वैद्याः । | Te vaidyāḥ. | ----- ---------- ? |

**4.3 अ**

## क्रियापदानि (ब.व.) Kriyāpadāni (ba.va.)

अधोरेखाङ्कितस्य केवलं वचनपरिवर्तनं करोतु - *Adhorekhāṅkitasya kevalaṁ vacanaparivartanam karotu* -

यथा -

| | |
|---|---|
| सः विद्यालये पठति । <br> Saḥ vidyālaye paṭhati. | ते विद्यालये पठन्ति । <br> Te vidyālaye paṭhanti. |

सा गृहे वसति । Sā gṛhe vasati. -------------------- ।

एषः कार्यालये तिष्ठति । Eṣaḥ kāryālaye tiṣṭhati. -------------------- ।

लतायां पुष्पं विकसति । Latāyām puṣpam vikasati. -------------------- ।

भवान् क्रीडाङ्गणे क्रीडति । Bhavān krīḍāṅgaṇe krīḍati. -------------------- ।

भवती प्रतिदिनं नृत्यति । Bhavatī pratidinaṁ nṛtyati. ------------------- ।

वने सिंहः गर्जति । Vane siṁhaḥ garjati. ------------------- ।

एषा चित्रं पश्यति । Eṣā citraṁ paśyati. ------------------- ।

बालः शालां गच्छति । Bālaḥ śālāṁ gacchati. ------------------- ।

वानरः फलं खादति । Vānaraḥ phalaṁ khādati. ------------------- ।

**4.3 आ**

*बहुवचनरूपाणि लिखतु - Bahuvacanarūpāṇi likhatu.*

यथा -

| | | | |
|---|---|---|---|
| भवान् पठतु । | Bhavān paṭhatu. | भवन्तः पठन्तु । | Bhavantaḥ paṭhantu. |
| भवती लिखतु । | Bhavatī likhatu. | -------- | ------------ । |
| अम्बा गच्छतु । | Ambā gacchatu. | -------- | ------------ । |
| अनुजः क्रीडतु । | Anujaḥ krīḍatu. | -------- | ------------ । |
| बालिका नृत्यतु । | Bālikā nṛtyatu. | -------- | ------------ । |
| एषः तिष्ठतु । | Eṣaḥ tiṣṭhatu. | -------- | ------------ । |

**4.3 इ**

*बहुवचनरूपाणि लिखतु - Bahuvacanarūpāṇi likhatu -*

यथा -

| | | | |
|---|---|---|---|
| अहं खादामि । | Aham khādāmi. | वयं खादामः । | Vayam khādāmaḥ. |
| अहं हसामि । | Aham hasāmi. | -------- | ------------ । |
| अहम् इच्छामि । | Aham icchāmi. | -------- | ------------ । |
| अहं पिबामि । | Aham pibāmi. | -------- | ------------ । |

**4.4**

## विशेषाभ्यासः Viśeṣābhyāsaḥ

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| करोति | Karoti | - कुर्वन्ति | Kurvanti | करोमि | Karomi | - कुर्मः | Kurmaḥ |
| शृणोति | Śṛṇoti | - शृण्वन्ति | Śṛṇvanti | शृणोमि | Śṛṇomi | - शृणुमः | Śṛṇumaḥ |
| ददाति | Dadāti | - ददति | Dadati | ददामि | Dadāmi | - दद्मः | Dadmaḥ |
| जानाति | Jānāti | - जानन्ति | Jānanti | जानामि | Jānāmi | - जानीमः | Jānīmaḥ |
| शक्नोति | Śaknoti | - शक्नुवन्ति | Śaknuvanti | शक्नोमि | Śaknomi | - शक्नुमः | Śaknumaḥ |

एतेषाम् उपयोगं कृत्वा वाक्यानि लिखतु - *Eteṣām upayogaṃ kṛtvā vākyāni likhatu.*

उदा - १. कर्मकराः कार्यं कुर्वन्ति ।
Karmakarāḥ kāryāṇi kurvanti.

२. ------------------------------ ।

३. ------------------------------ ।  ४. ------------------------------ ।

५. ------------------------------ ।  ६. ------------------------------ ।

७. ------------------------------ ।  ८. ------------------------------ ।

९. ------------------------------ ।  १०. ------------------------------ ।

## 4.5 कति ? Kati ?

उदाहरणं दृष्ट्वा तादृशानि वाक्यानि लिखतु - *Udāharaṇam dṛṣṭvā tādṛśāni vākyāni likhatu*

यथा -



पञ्च स्यूताः सन्ति । Pañca syūtāḥ santi.
कति स्यूताः सन्ति ? Kati syūtāḥ santi ?



षट् फलानि सन्ति । Ṣaṭ phalāni santi.
------------------------------ ?



अष्ट पर्णानि सन्ति । Aṣṭa parṇāni santi.
------------------------------ ?



षट् वातायनानि सन्ति । Ṣaṭ vātāyanāni santi.
------------------------------ ?



-------- अङ्कन्यः सन्ति । aṅkanyaḥ santi.
------------------------------ ?



-------- कुञ्चिकाः kuñcikāḥ -------- ।
------------------------------ ?

**वि.सू. -** कति अस्ति ? Kati asti ? ✗
कति सन्ति ? Kati santi ? ✓

**5.1**

अत्र प्रश्नस्य एकम् उत्तरं लिखितम् अस्ति । आवरणे विद्यमानस्य पदस्य साहाय्येन पुनः त्रीणि उत्तराणि लिखतु - *Atra praśnasya ekam uttaraṁ likhitam asti. Āvaraṇe vidyamānasya padasya sāhāyyena punaḥ trīṇi uttarāṇi likhatu.*



कुत्र पुस्तकम् अस्ति ? Kutra pustakam asti ?

(स्यूतः Syūtaḥ) - स्यूते पुस्तकम् अस्ति ।
Syūte pustakaṁ asti.

(ग्रन्थालयः *Granthālayaḥ*) - ---- -------- ---- ।

(आपणः *Āpaṇaḥ*) - ---- -------- ---- ।

(हस्तः *Hastaḥ*) - ---- -------- ---- ।



कुत्र बालकः अस्ति ? Kutra bālakaḥ asti ?

(गृहम् *Gṛham*) - गृहे बालकः अस्ति । Gṛhe bālakaḥ asti.

(नगरम् *Nagaram*) - ---- -------- ---- ।

(चित्रमन्दिरम् *Citramandiram*) - ---- -------- ---- ।

(उपाहारगृहम् *Upāhāragṛham*) ---- -------- ---- ।



कुत्र पाञ्चालिका अस्ति ? Kutra Pāñcālikā asti ?

(उत्पीठिका *Utpīṭhikā*) - उत्पीठिकायां पाञ्चालिका अस्ति ।
Utpīṭhikāyāṁ pāñcālikā asti.

(कपाटिका *Kapāṭikā*) ---- -------- ---- ।

(पेटिका *Peṭikā*) ---- -------- ---- ।

(निधानिका *Nidhānikā*) ---- -------- ---- ।



कुत्र मन्दिरम् अस्ति ? Kutra mandiram asti ?

(काशी *Kāśī*) - काश्यां मन्दिरम् अस्ति ।
Kāśyāṁ mandiraṁ asti.

(उज्जयिनी *Ujjayinī*) ---- ---- ---- ।

(पुरी *Purī*) ---- जगन्नाथ Jagannātha ---- ---- ।

कन्याकुमारी *Kanyākumārī*) ---- ---- ---- ।

**5.2**

| | | | |
|---|---|---|---|
| मम Mama | पिता pitā<br><br>सहोदरः Sahodaraḥ | कार्यालयः Kāryālayaḥ<br>वित्तकोषः vittakoṣaḥ<br>यन्त्रागारम् Yantrāgāram<br>दूरवाणीविनिमयकेन्द्रम् Dūravāṇīvinimayakendram<br>स्वायत्तसंस्था Svāyattasaṃsthā | कार्यं करोति । Kāryam karoti |

एतस्य कोष्ठकस्य आधारेण १० वाक्यानि लिखतु - *Etasya koṣṭhakasya ādhāreṇa 10 vākyāni likhatu*

यथा - १. मम पिता कार्यालये कार्यं करोति ।
Mama pitā kāryālaye kāryam karoti.

२. ---- ---- ---- ---- ---- ।
३. ---- ---- ---- ---- ---- ।
४. ---- ---- ---- ---- ---- ।
५. ---- ---- ---- ---- ---- ।
६. ---- ---- ---- ---- ---- ।
७. ---- ---- ---- ---- ---- ।
८. ---- ---- ---- ---- ---- ।
९. ---- ---- ---- ---- ---- ।
१०. ---- ---- ---- ---- ---- ।

**5.3**

एतं पदबन्धम् उचितपदैः पूरयतु - *Etam padabandham ucitapadaiḥ pūrayatu.*

यथा -

चालकः अत्र अस्ति । - Cālakaḥ atra asti. →
भवतः माता कुत्र अस्ति ? Bhavataḥ mātā kutra asti ? →
नागरिकाः अत्र वसन्ति । Nāgarikāḥ atra vasanti. →
अत्र कार्याणि कुर्वन्ति । Atra kāryāṇi kurvanti. →
भवान् कुत्र पठति ? Bhavān kutra paṭhati ? →
धनम् अत्र रक्षामः । Dhanam atra rakṣāmaḥ. →
चलनचित्रम् अत्र पश्यतु । Calanacitram atra paśyatu. →
मशी कुत्र अस्ति ? Maṣī kutra asti ? →

| | | | | |
|---|---|---|---|---|
| लो | क | या | ने | |
| गृ | | | | |
| | | रे | | |
| | र्या | | | |
| वि | | | ये | |
| | ण | को | | |
| | त्र | | न्दि | |
| | | न्या | | |

5.4 अ

# कदा ? Kadā ?

एतेषां प्रश्नानाम् उत्तरं लिखतु - Eteṣām praśnānām uttaraṃ likhatu.

यथा - भवान् कदा उत्तिष्ठति ? Bhavān kadā uttiṣṭhati ?

अहं पञ्चवादने उत्तिष्ठामि । Aham pañcavādane uttiṣṭhāmi.

भवान् कदा विद्यालयं गच्छति ? Bhavān kadā vidyālayam gacchati ?

——— ——— ——— ——— ——— ।

सूर्योदयः कदा भवति ? Sūryodayaḥ kadā bhavati ?

——— ——— ——— ——— ——— ।

भवती कदा क्रीडति ? Bhavatī kadā krīḍati ?

——— ——— ——— ——— ——— ।

भवती कदा पठति ? Bhavatī kadā paṭhati ?

——— ——— ——— ——— ——— ।

5.4 आ

एतेषाम् उत्तराणां प्रश्नं लिखतु - Eteṣām uttarāṇāṃ praśnam likhatu.

सीता सायङ्काले नृत्याभ्यासं करोति । Sītā sāyaṅkāle nṛtyābhyāsam karoti.

——— ——— ——— ——— ——— ——— ——— ?

वेङ्कटेशः षड्वादने योगासनं करोति । Veṅkaṭeśaḥ ṣaḍvādane yogāsanam karoti.

——— ——— ——— ——— ——— ——— ——— ?

माता दशवादने पाकं करोति । Mātā daśavādane pākam karoti.

——— ——— ——— ——— ——— ——— ——— ?

सा प्रातःकाले पूजां करोति । Sā prātaḥkāle pūjām karoti.

——— ——— ——— ——— ——— ——— ——— ?

अहं मध्याह्ने भोजनं करोमि । Aham madhyāhne bhojanam karomi.

——— ——— ——— ——— ——— ——— ——— ?

## 5.5

प्रपरह्यः ⇦ परह्यः ⇦ ह्यः ⇦ **अद्य** ⇨ श्वः ⇨ परश्वः ⇨ प्रपरश्वः

Praparahyaḥ Parahyaḥ Hyaḥ Adya Śvaḥ Paraśvaḥ Praparaśvaḥ

अद्य रिक्तानि स्थलानि पूरयतु – *Adya riktāni sthalāni pūrayatu.*

अद्य भानुवासरः Adya bhānuvāsaraḥ

---- शनिवासरः Śanivāsaraḥ

---- सोमवासरः Somavāsaraḥ

---- शुक्रवासरः Śukravāsaraḥ

---- मङ्गलवासरः Maṅgalavāsaraḥ

-------------- ।

-------------- ।

-------------- ।

अद्य मङ्गलवासरः । Adya maṅgalavāsaraḥ.

श्वः बुधवासरः । Śvaḥ budhavāsaraḥ.

-------------- ।

-------------- ।

## 5.6

प्रथमवाक्यं पठित्वा प्रश्नस्य उत्तरं लिखतु – *Prathamavākyam paṭhitvā praśnasya uttaram likhatu.*

| | |
|---|---|
| यथा - १. अद्य षोडशदिनाङ्कः । | Adya ṣoḍaśadināṅkaḥ. |
| पञ्चदशदिनाङ्कः कदा ? | Pañcadaśadināṅkaḥ kadā ? |
| पञ्चदशदिनाङ्कः ह्यः । | Pañcadaśadināṅkaḥ hyaḥ. |
| २. अद्य सोमवासरः । | Adya somavāsaraḥ. |
| मङ्गलवासरः कदा ? | Maṅgalavāsaraḥ kadā ? |
| ---- ------ ---- ----- । | |
| ३. अद्य २४ तमदिनाङ्कः । | Adya 24 tamadināṅkaḥ. |
| २६ तमदिनाङ्कः कदा ? | 26 tamadināṅkaḥ kadā ? |
| ---- ------ ---- ----- । | |

## 6.1 एतत् सम्भाषणं पठतु - *Etat sambhāṣaṇam paṭhatu.*



''हरिः ओम्, सुप्रभातम् !'' 'Hariḥ om, suprabhātam !'

''नमस्ते श्रीमन् ! स्वागतम्, आगच्छतु, उपविशतु !''
'Namaste śrīman ! Svāgatam, āgacchatu, upaviśatu.'

''धन्यवादः !'' 'Dhanyavādaḥ.'

''सर्वं कुशलं वा ?'' 'Sarvam kuśalam vā ?'

''आम्, कुशलम् । भवान् एतत् पुस्तकं स्वीकरोतु !''
'Ām, kuśalam. Bhavān etat pustakam svīkarotu.'

''कथम् अस्ति एतत् पुस्तकम् ?'' 'Katham asti etat pustakam ?'

''समीचीनम् अस्ति । भवान् अपि पठतु !'' 'Samīcīnam asti. Bhavān api paṭhatu.'

''अस्तु, अनन्तरं पठामि !'' 'Astu, anantaram paṭhāmi.'

''अहं गच्छामि !'' 'Aham gacchāmi.'

''तिष्ठतु, पानीयं स्वीकरोतु !'' 'Tiṣṭhatu, pānīyam svīkarotu.'

''क्षम्यताम्, मास्तु !'' 'Kṣamyatām, māstu.'

''किञ्चित् स्वीकरोतु !'' 'Kiñcit svīkarotu.'

''अस्तु, धन्यवादः !'' 'Astu, Dhanyavādaḥ.'

''शर्करा अधिका अस्ति किल !'' 'Śarkarā adhikā asti kila !'

''चिन्ता मास्तु । *(पिबति)* अहम् आगच्छामि, नमस्कारः !''
'Cintā māstu. *(pibati)* aham āgacchāmi, namaskāraḥ.'

''नमस्कारः !'' 'Namaskāraḥ.'

| | | |
|---|---|---|
| **हरिः ओम्** Hariḥ om | **सुप्रभातम्** Suprabhātam | **स्वागतम्** Svāgatam |
| **क्षम्यताम्** Kṣamyatām | **नमस्कारः** Namaskāraḥ | **चिन्ता मास्तु** Cintā māstu |



१. विद्यालयः Vidyālayaḥ



२. ग्रन्थालयः Granthālayaḥ



३. देवालयः Devālayaḥ



४. कार्यालयः Kāryālayaḥ



५. आपणः Āpaṇaḥ



६. रेलस्थानकम् Relsthānakam



७. चित्रमन्दिरम् Citramandiram



८. उद्यानम् Udyānam



९. प्रदर्शिनी Pradarśinī

चित्रं दृष्ट्वा उदाहरणं दृष्ट्वा तादृशानि वाक्यानि लिखतु – *Citram dṛṣṭvā udāharaṇam dṛṣṭvā tādṛśāni vākyāni likhatu*

यथा – १. मम मित्रं विद्यालयं गच्छति । Mama mitram vidyālayam gacchati.

२. ______ ______ ______ ______ ______ ।

३. ______ ______ ______ ______ ______ ।

४. ______ ______ ______ ______ ______ ।

५. ______ ______ ______ ______ ______ ।

६. ______ ______ ______ ______ ______ ।

७. ______ ______ ______ ______ ______ ।

८. ______ ______ ______ ______ ______ ।

९. ______ ______ ______ ______ ______ ।

*अत्र एकं सम्भाषणम् अस्ति । सम्भाषणं पठतु । आवरणे विद्यमानानां शब्दानाम् उचितरूपाणि रिक्ते स्थले लिखतु -* *Atra ekam sambhāṣaṇam asti. Sambhāṣaṇam paṭhatu. Āvaraṇe vidyamānānām śabdānām ucitarūpāṇi rikte sthale likhatu.*

पिता Pitā - पुत्र । (पाठः) ---------- पठतु । Putra ! (pāṭhaḥ) .....paṭhatu.

पुत्रः Putraḥ- अहं (पाठः) ---------- पठितुं न शक्नोमि । Aham (Pāṭhaḥ) paṭhitum na śknomi.

पिता - किमर्थम् ? Kimartham ?

पुत्रः - अहम् (विद्यालयः) ---------- न गतवान् । Aham (vidyālayaḥ) .....na gatavān.

पिता - भवतु, अहं (भवान्) ---------- पाठयामि । Bhavatu, aham (bhavān) ...... pāṭhayāmi.

पुत्रः - सत्यं, भवान् (अहं) ---------- पाठयति ? Satyam, bhavān (aham) ...... pāṭhayati ?

पिता - आम्, पाठयामि । Ām, pāṭhayāmi.

पुत्री - तात, (अहम्) ---------- अपि पाठयतु । Tāta, (aham).... api pāṭhayatu.

पिता - अस्तु, (भवती) ---------- अपि पाठयामि । Astu, (bhavatī) ..... api pāṭhayāmi.

पुत्रः - कदा पाठयति ? Kadā pāṭhayati ?

पिता - इदानीं (भवान्) ---------- पाठयामि । Idānīm (bhavān) ..... pāṭhayāmi.

पुत्रः - (अनुजा) ---------- कदा पाठयति ? (Anujā) ..... kadā pāṭhayati ?

पिता - (सा) ---------- सायङ्काले पाठयामि । (Sā) ...... sāyaṅkāle pāṭhayāmi.

वदतु, (कः पाठः) ---------- पाठयामि ? Vadatu, (kaḥ pāṭhaḥ) ...... pāṭhayāmi ?

पुत्रः - (एषः पाठः) ---------- पाठयतु । (Eṣaḥ pāṭhaḥ) ......pāṭhayatu.

पिता - (सर्वे पाठाः) ---------- पाठयामि । (Sarve pāṭhāḥ) ...... pāṭhayāmi.

| | | | |
|---|---|---|---|
| तम् Tam | ताम् Tām | तत् Tat | भवन्तम् Bhavantam |
| एतम् Etam | एताम् Etām | एतत् Etat | भवतीम् Bhavatīm |
| कम् Kam | काम् Kām | किम् Kim | माम् Mām |




| | |
|---|---|
| सः केशवः । | Saḥ Keśavaḥ. |
| केशवस्य **पुरतः** शकटः अस्ति । | Keśavasya purataḥ śakaṭaḥ asti. |
| तस्य **पृष्ठतः** वसतिमन्दिरम् अस्ति । | Tasya prṣṭhataḥ vasatimandiram asti. |
| तस्य **दक्षिणतः** देवालयः अस्ति । | Tasya dakṣiṇataḥ devālayaḥ asti. |
| तस्य **वामतः** वृक्षः अस्ति । | Tasya vāmataḥ vṛkṣaḥ asti. |
| देवालयस्य **उपरि** कलशः अस्ति । | Devālayasya upari kalaśaha asti. |
| शकटस्य **अधः** शुनकः अस्ति । | Śakaṭasya adhaḥ śunakaḥ asti. |

| | | | | | |
|---|---|---|---|---|---|
| **पुरतः** | Puratah | **वामतः** | Vāmatah | **उपरि** | Upari |
| **पृष्ठतः** | Prṣṭhatah | **दक्षिणतः** | Daksinatah | **अधः** | Adhaḥ |

## 8.2 अ

**एतत् चित्रं पश्यतु । अनन्तरम् एतानि वाक्यानि शुद्धानि अशुद्धानि वा इति लिखतु** – *Etat citram paśyatu. Anantaram etāni vākyāni śuddhāni aśuddhāni vā iti likhatu.*



१. गृहस्य पुरतः वृक्षः अस्ति । ✓
Gṛhasya purataḥ vṛkṣaḥ asti.

२. गृहस्य वामतः उद्यानम् अस्ति । ×
Gṛhasya vāmataḥ udyānam asti.

३. बालकः वृक्षस्य उपरि अस्ति ।
Bālakaḥ vṛkṣasya upari asti.

४. वृक्षस्य अधः वृद्धः अस्ति ।
Vṛkṣasya adhaḥ vṛddhaḥ asti.

५. गृहस्य पृष्ठतः मार्गः अस्ति ।
Gṛhasya pṛṣṭhataḥ mārgaḥ asti.

६. बालकस्य हस्ते नारिकेलफलम् अस्ति ।
Bālakasya haste nārikelaphalam asti.

## 8.2 आ

**एतत् चित्रं दृष्ट्वा उपरि-अधः-पुरतः-पृष्ठतः-वामतः-दक्षिणतः-एतेषाम् उपयोगं कृत्वा ६ वाक्यानि लिखतु** – *Etat citraṁ dṛṣṭvā upari-adhaḥ-vāmataḥ-dakṣiṇataḥ-eteṣām upayogam kṛtvā 6 vākyāni likhatu.*

१. ______________________________ ।

२. ______________________________ ।

३. ______________________________ ।

४. ______________________________ ।

५. ______________________________ ।

६. ______________________________ ।

**8.2 इ**



बालकः कुत्र अस्ति ? बालकः बहिः अस्ति ।
Bālakaḥ kutra asti ? Bālakaḥ bahiḥ asti.

बालिका कुत्र अस्ति ? बालिका अन्तः अस्ति ।
Bālikā kutra asti ? Bālikā antaḥ asti.

मार्जालः Mārjālaḥ ______________________ ?

______________________ ।

शुनकः Śunakaḥ ______________________ ?

______________________ ।

**अन्तः** Antah **बहिः** Bahiḥ

**9.1**



| | | | |
|---|---|---|---|
| पुत्रः Putraḥ | - | एतत् लोकयानं कुतः आगतम् ? | Etat lokayānaṁ kutaḥ āgatam ? |
| पिता Pitā | - | मैसूरुतः आगतम् । | Maisurutaḥ āgatam. |
| पुत्रः | - | इतः कुत्र गच्छति ? | Itaḥ kutra gacchati ? |
| पिता | - | इतः मैसूरु गच्छति । | Itaḥ Maisūru gacchati. |
| पुत्रः | - | ततः कदा आगमिष्यति ? | Tataḥ kadā āgamiṣyati ? |
| पिता | - | ततः श्वः आगमिष्यति । | Tataḥ śvaḥ āgamiṣyati. |
| पुत्रः | - | एते जनाः किं कुर्वन्ति ? | Ete janāḥ kiṁ kurvanti ? |
| पिता | - | एते इतस्ततः सञ्चरन्ति । | Ete itastataḥ sañcaranti. |

| | | | | | |
|---|---|---|---|---|---|
| इतः | Itah | ततः | Tatah | कुतः | Kutah |
| ........ तः | Tah | इतस्ततः | Itastatah | | |

**विशेषसूचना** Viśesasūcanā –

| | | | | | |
|---|---|---|---|---|---|
| अत्रतः | Atratah | × | इतः | Itah | ✓ |
| तत्रतः | Tatratah | × | ततः | Tatah | ✓ |
| कुत्रतः | Kutratah | × | कुतः | Kutah | ✓ |
| उपरितः | Uparitah | × | उपरिष्टात् | Uparistāt | ✓ |

## 9.2




शङ्करः बेङ्गलूरुतः प्रस्थाय दक्षिणभारतप्रवासं कृतवान् । सः कुतः कुत्र गतवान् इति लिखतु –
*Śankarah Bengalūrutah prasthāya daksinabhāratapravāsam krtavān. sah kutah kutra gatavān iti likhatu.*

यथा – शङ्करः बेङ्गलूरुतः शृङ्गेरी गतवान् । Śankarah Bengalūrutah Śrngerī gatavān.

शृङ्गेरीतः धर्मस्थलं गतवान् । Śrngerītah Dharmasthalam gatavān.

—————————————— ।

—————————————— ।

—————————————— ।

—————————————— ।

—————————————— ।

—————————————— ।

—————————————— ।

—————————— बेङ्गलूरु आगतवान् । Beṅgalūru āgatavān.

**10.1 अ**

| | |
|---|---|
| **शीघ्रम्** Śīghram | **मन्दम्** Mandam |

उदा - अश्वः **शीघ्रं** गच्छति । Aśvaḥ śīghram gacchati.
कूर्मः **मन्दं** गच्छति । Kūrmaḥ mandam gacchati.

| | |
|---|---|
| **उच्चैः** Uccaiḥ | **शनैः** Śanaiḥ |

उदा - सिंहः **उच्चैः** गर्जति । Siṃhaḥ uccaiḥ garjati.
बालिका **शनैः** गायति । Bālikā śanaiḥ gāyati.

**10.1 आ**

*शीघ्रम्, मन्दम्, उच्चैः, शनैः एतेषु उचितेन रूपेण रिक्तस्थानं पूरयतु* – *Śīghram, mandam, uccaiḥ, śanaiḥ eteṣu ucitena rūpeṇa riktasthānam pūrayatu.*

१. सः ———— भोजनं करोति । Saḥ ...... bhojanam karoti.
२. उन्मत्तः ———— हसति । Unmattaḥ ...... hasati.
३. मम माता ———— कार्यं करोति । Mama mātā ...... kāryam karoti.
४. भवती ———— सम्भाषणं करोतु ।
Bhavatī ...... sambhāṣaṇam karotu.
५. न शृणोमि, कृपया किञ्चित् ———— वदतु ।
Na śṛṇomi, kṛpayā kiñcit ...... vadatu.

६. --------------- प्रस्थानं करोतु, विलम्बः भवति ।
...... prasthānam karotu, vilambaḥ bhavati.

७. इतोऽपि समयः अस्ति, -------------- भोजनं करोतु ।
Itopi samayaḥ asti, ...... bhojanam karotu.

८. एतत् लोकयानं सर्वदा -------------- गच्छति ।
Etat lokayānam sarvadā ...... gacchati.

९. अत्र शिशुः निद्रां करोति, कृपया -------------- वदतु ।
Atra śiśuḥ nidrām karoti, kṛpayā ...... vadatu.

१०. सः -------------- भाषणं करोति, ध्वनिवर्धकम् एव न आवश्यकम् ।
Saḥ ...... bhāṣaṇam karoti, dhvanivardhakam eva na āvaśyakam.

10.1 इ

**कथम् ?** Katham ?

| | | | |
|---|---|---|---|
| सम्यक् | Samyak | समीचीनम् | Samīcīnam |
| उत्तमम् | Uttamam | सुन्दरम् | Sundaram |

*एतेषां प्रश्नानाम् उत्तरं लिखतु - Eteṣām praśnānām uttaram likhatu*

यथा - आरोग्यं कथम् अस्ति ? — आरोग्यं सम्यक् अस्ति ।
Ārogyam katham asti ? — ārogyam samyak asti.

वातावरणं कथम् अस्ति ? ------------------------ ।
Vātāvaraṇam katham asti ?

बालकः कथं धावति ? ------------------------ ।
Bālakaḥ katham dhāvati ?

एतत् वस्त्रं कथम् अस्ति ? ------------------------ ।
Etat vastram katham asti ?

भीमसेनजोशी कथं गायति ? ------------------------ ।
Bhīmasenajośī katham gāyati ?

तेण्डुल्कर् कथं क्रीडति ? ------------------------ ।
Tendulkar katham krīḍati ?

*एतेषाम् उत्तराणां प्रश्नान् लिखतु - Eteṣām uttarāṇām praśnān likhatu.*

| | |
|---|---|
| यथा - उद्यानं सुन्दरम् अस्ति ।<br>Udyānam sundaram asti. | उद्यानं कथम् अस्ति ?<br>Udyānam katham asti ? |
| भोजनम् उत्तमम् अस्ति ।<br>Bhojanam uttamam asti. | ______________________ ? |
| एतत् चलनचित्रं सम्यक् नास्ति ।<br>Etat calanacitram samyak nāsti. | ______________________ ? |
| तत् पुस्तकम् उत्तमम् अस्ति ।<br>Tat pustakam uttamam asti. | ______________________ ? |
| सः सर्वं कार्यं सम्यक् करोति ।<br>Saḥ sarvam kāryam samyak karoti. | ______________________ ? |
| रामायणं बहु विस्तृतम् अस्ति ।<br>Rāmāyaṇam bahu vistṛtam asti. | ______________________ ? |

## किमर्थम् ? Kimartham ?

सः **किमर्थं** विद्यालयं गच्छति ? Saḥ kimartham vidyālayam gacchati ?

सः **पठनार्थं** विद्यालयं गच्छति । Saḥ paṭhanārtham vidyālayam gacchati.

*अत्र शब्दद्वयं लिखितम् अस्ति । तत् उपयुज्य प्रश्नम् उत्तरं च लिखतु - Atra śabdadvayam likhitam asti. Tat upayujya praśnam uttaram ca likhatu.*

यथा - योगासनम् / आरोग्यार्थम् Yogāsanam / ārogyārtham

सः किमर्थं योगासनं करोति ? Saḥ kimartham yogāsanam karoti ?

सः आरोग्यार्थं योगासनं करोति । Saḥ ārogyārtham yogāsanam karoti.

१. ग्रन्थालयम् / पठनार्थम् Granthālayam / paṭhanārtham

______ ______ ______ गच्छति ? gacchati ?

______ ______ ______ ______ ।

२. चिकित्सालयम् / औषधार्थम् Cikitsālayam / auṣadhārtham

______ ______ ______ गच्छति ? gacchati ?

______ ______ ______ ______ ।

३. विदेशम् / प्रवासार्थम् Videśam / pravāsārtham

______ ______ ______ गतवान् ? gatavān ?

______ ______ ______ ______ ।

# भूतकालरूपाणि Bhūtakālarūpāṇi

*रिक्तानि स्थलानि पूरयतु – Riktāni sthalāni pūrayatu*

| | | | पुंलिङ्गे Puṃlinge | | स्त्रीलिङ्गे Strīlinge | |
|---|---|---|---|---|---|---|
| | | | ए.व. | ब.व. | ए.व. | ब.व. |
| पठति | Paṭhati | – | पठितवान्<br>Paṭhitavān | पठितवन्तः<br>Paṭhitavantaḥ | पठितवती<br>Paṭhitavatī | पठितवत्यः<br>Paṭhitavatyaḥ |
| पतति | Patati | – | पतितवान्<br>Patitavān | पतितवन्तः<br>Patitavantaḥ | पतितवती<br>Paritavatī | पतितवत्यः<br>Patitavatyaḥ |
| वदति | Vadati | – | उक्त —— | —————— | —————— | —————— |
| पिबति | Pibati | – | पीत —— | —————— | —————— | —————— |
| लिखति | Likhati | – | लिखित —— | —————— | —————— | —————— |
| नयति | Nayati | – | नीत —— | —————— | —————— | —————— |
| पश्यति | Paśyati | – | दृष्ट —— | —————— | —————— | —————— |
| पृच्छति | Prcchati | – | पृष्ट —— | —————— | —————— | —————— |
| त्यजति | Tyajati | – | त्यक्त —— | —————— | —————— | —————— |
| खादति | Khādati | – | खादित —— | —————— | —————— | —————— |
| जानाति | Jānāti | – | ज्ञात —— | —————— | —————— | —————— |
| करोति | Karoti | – | कृत —— | —————— | —————— | —————— |
| शृणोति | Śṛṇoti | – | श्रुत —— | —————— | —————— | —————— |
| ददाति | Dadāti | – | दत्त —— | —————— | —————— | —————— |
| उत्तिष्ठति | Uttiṣṭhati | – | उत्थित —— | —————— | —————— | —————— |
| उपविशति | Upaviśati | – | उपविष्ट —— | —————— | —————— | |
| स्थापयति | Sthāpayati | – | स्थापित —— | —————— | —————— | —————— |
| गृह्णाति | Gṛhṇāti | – | गृहीत —— | —————— | —————— | —————— |
| रोदिति | Roditi | – | रुदित —— | —————— | —————— | —————— |
| शक्नोति | Śaknoti | – | शक्त —— | —————— | —————— | —————— |
| भवति | Bhavati | – | अभवत्<br>Abhavat | अभवन्<br>Abhavan | अभवत्<br>Abhavat | अभवन्<br>Abhavan |

## 11.2

| वर्तमानकालः *Vartamānakālaḥ* | | | | भूतकालः *Bhūtakālaḥ* | | | |
|---|---|---|---|---|---|---|---|
| अस्ति | Asti | सन्ति | Santi | आसीत् | Āsīt | आसन् | Āsan |
| अस्मि | Asmi | स्मः | Smaḥ | आसम् | Āsam | आस्म | Āsma |

एतत् सम्भाषणं पठतु - *Etat sambhāṣaṇam paṭhatu.*



''रङ्गनाथ ! ह्यः भवान् कुत्र आसीत् ?''
"Ranganātha ! hyaḥ bhavān kutra āsīt ?"

''अहं मित्रस्य[1] गृहे आसम् ।''
"Aham mitrasya gṛhe āsam."

''तत्र कः विशेषः आसीत् ?''
"Tatra kaḥ viśeṣaḥ āsīt ?"

''मित्रस्य[2] जन्मदिनम् आसीत् ।''
"Mitrasya janmadinam āsīt."

''तत्र जयरामः[3], अनन्तः[4], रामकृष्णः[5] इत्यादयः आसन् वा ?''
"Tatra Jayarāmaḥ, Anantaḥ, Rāmakṛṣṇaḥ ityādayaḥ āsan vā ?"

''आम्, सर्वे अपि आसन् ।'' "Ām, sarve api āsan."

''भवतः गृहतः के के तत्र गतवन्तः ?'' "Bhavataḥ gṛhataḥ ke ke tatra gatavantaḥ ?"

''वयं सर्वे अपि गतवन्तः आस्म ।'' "Vayam sarve api gatavantaḥ āsma."

एतस्मिन् सम्भाषणे *1, 2, 3, 4, 5,* इत्यत्र सुरेशस्य, गोविन्दः, मोहनः, राजीवः इति शब्दपरिवर्तनं कृत्वा पुनः सम्भाषणं पठतु । *Etasmin sambhāṣaṇe 1,2,3,4,5 ityatra Sureśasya, Govindaḥ, Mohanaḥ, Rājīvaḥ iti śabdaparivartanam kṛtvā punaḥ sambhāṣaṇam paṭhatu.*

## 11.3 अ

एतां कथां पठतु - *Etām kathām paṭhatu.*

कश्चित् बालकः **अस्ति** । तस्य नाम सुधीरः । एकदा सुधीरः नगरं **गच्छति** । शिरस्त्राणि **क्रीणाति** । तेषां विक्रयणार्थं ग्रामं **गच्छति** । मार्गे अरण्यम् **अस्ति** । सुधीरः श्रान्तः **भवति** । सः वृक्षस्य अधः **उपविशति** । शिरस्त्रपेटिकां पार्श्वे **स्थापयति** । तत्र एव निद्रां **करोति** ।

Kaścit bālakaḥ asti. Tasya nāma Sudhīraḥ. Ekadā Sudhīraḥ nagaram gacchati. Śirastrāṇi krīṇāti. Teṣām vikrayaṇārtham grāmam gacchati. Mārge araṇyam asti. Sudhīraḥ

śrāntaḥ bhavati. Saḥ vṛkṣasya adhaḥ upaviśati. Śirastrapeṭikām pārśve sthāpayati. Tatra eva nidrām karoti.

तत्र केचन वानराः **सन्ति** । एकः वानरः सुधीरस्य समीपम् **आगच्छति** । सः पेटिकां **पश्यति** । **उद्घाटयति** । एकं शिरस्त्रं **गृह्णाति** । शिरसि **धारयति** । पुनः वृक्षस्य उपरि **गच्छति**, **उपविशति** । Tatra kecana vānarāḥ santi. Ekaḥ vānaraḥ Sudhīrasya samīpam āgacchati. Saḥ peṭikām paśyati. Udghāṭayati. Ekam śirastram gṛhṇāti. Śirasi dhārayati. Punaḥ vṛkṣasya upari gacchati, upaviśati.

अन्ये अपि वानराः एतत् **पश्यन्ति** । ते अपि शिरस्त्रम् **इच्छन्ति** । अतः अधः **आगच्छन्ति**, शिरस्त्राणि **धारयन्ति**, वृक्षे **उपविशन्ति** । Anye api vānarāḥ etat paśyanti. Te api śirastram icchanti. Ataḥ adhaḥ āgacchanti, śirastrāṇi dhārayanti, vṛkṣe upaviśanti.

सुधीरः जागरितः **भवति** । पुरतः **पश्यति** । एकम् अपि शिरस्त्रं नास्ति । सः वानरान् **पश्यति** । शिरस्त्राणि तत्र **सन्ति** । सः दण्डं **दर्शयति** । वानराः वृक्षशाखाः **दर्शयन्ति** । सुधीरः शिलाखण्डं **क्षिपति** । वानराः फलानि **क्षिपन्ति** । Sudhīraḥ jāgaritaḥ bhavati. Purataḥ paśyati. Ekam api śirastram nāsti ! Saḥ vānarān paśyati. Śirastrāṇi tatra santi. Saḥ daṇḍam darśayati. Vānarāḥ vṛkṣaśākhāḥ darśayanti. Sudhīraḥ śilākhaṇḍam kṣipati. Vānarāḥ phalāni kṣipanti.

सुधीरः उपायं **करोति** । वानराः अनुकरणशीलाः इति सः **जानाति** । सः स्वकीयं शिरस्त्रं भूमौ **क्षिपति** । सर्वे अपि वानराः शिरस्त्राणि **क्षिपन्ति** । सुधीरः सर्वाणि **सङ्गृह्णाति** । शीघ्रम् अन्यत्र **गच्छति** । Sudhīraḥ upāyam karoti. Vānarāḥ anukaraṇaśīlāḥ iti saḥ jānāti. Saḥ svakīyam śirastram bhūmau kṣipati. Sarve api vānarāḥ śirastrāṇi kṣipanti. Sudhīraḥ sarvāṇi saṅgṛhṇāti. Śīghram anyatra gacchati.

## 11.3 आ

*कथायां स्थूलाक्षरैः दृश्यमानानि क्रियापदानि भूतकालरूपेण परिवर्तयतु* – *Kathāyām sthūlākṣaraiḥ dṛśyamānāni kriyāpadāni bhūtakālarūpeṇa parivartayatu.*

*यथा* –

| | | | | | |
|---|---|---|---|---|---|
| अस्ति<br>Asti | आसीत्<br>Āsīt | गच्छति<br>Gacchati | गतवान्<br>Gatavān | ______ | ______ |
| क्रीणाति<br>Krīṇāti | क्रीतवान्<br>Krītavān | भवति<br>Bhavati | अभवत्<br>Abhavat | ______ | ______ |
| ______ | ______ | ______ | ______ | ______ | ______ |
| ______ | ______ | ______ | ______ | ______ | ______ |
| ______ | ______ | ______ | ______ | ______ | ______ |
| ______ | ______ | ______ | ______ | ______ | ______ |
| ______ | ______ | ______ | ______ | ______ | ______ |

**11.3 इ**

इदानीं क्रियापदानां भूतकालरूपाणि उपयुज्य कथां पुनः पठतु – *Idānīṁ kriyāpadānāṁ bhūtakālarūpāṇi upayujya kathāṁ punaḥ paṭhatu.*

**11.3 ई**

एतत् दृष्ट्वा कः कदा कुत्र आसीत् इति लिखतु – *Etat dṛṣṭvā kaḥ kadā kutra āsīt iti likhatu.*

| | | |
|---|---|---|
| सन्दीपः Sandīpaḥ | १० – ०० 10-00 | विद्यालयः vidyālayaḥ |
| दिव्या Divyā | ११ – ०० 11-00 | क्रीडाङ्गणम् krīḍāṅgaṇam |
| कृष्णः Kṛṣṇaḥ | १२ – ०० 12-00 | गृहम् gṛham |
| अहम् Aham | ७ – ०० 7-00 | ग्रन्थालयः granthālayaḥ |
| वयम् Vayam | ८ – ०० 8-00 | वित्तकोषः vittakoṣaḥ |

यथा – १. सन्दीपः दशवादने विद्यालये आसीत् । Sandīpaḥ daśavādane vidyālaye āsīt.

२. ______________________ ।

३. ______________________ ।

४. ______________________ ।

५. ______________________ ।

६. ______________________ ।

## 12.1 भविष्यत्कालरूपाणि Bhaviṣyatkālarūpāṇi

सुब्रह्मण्यः श्वः विद्यालयं न **गमिष्यति** । सः चिकित्सालयं **गमिष्यति** । तत्र वैद्यं **द्रक्ष्यति** । तेन सह सम्भाषणं **करिष्यति** । स्वस्य अनारोग्यं **निवेदयिष्यति** । सः श्वः न **क्रीडिष्यति** । गृहे उपविश्य पाठं **पठिष्यति** । Subrahmaṇyaḥ śvaḥ vidyālayam na gamiṣyati. Saḥ cikitsālayam gamiṣyati. Tatra vaidyam drakṣyati. Tena saha sambhāṣaṇam kariṣyati. Svasya anārogyam nivedayiṣyati. Saḥ śvaḥ na krīḍiṣyati. gṛhe upaviśya pāṭham paṭhiṣyati.

सुब्रह्मण्यः श्वः किं किं करिष्यति इति तत्र लिखितम् अस्ति । *Subrahmaṇyaḥ śvaḥ kiṁ kiṁ kariṣyati iti tatra likhitam asti.*

भवान् श्वः किं किं करिष्यति इति अत्र लिखतु – *Bhavān śvaḥ kiṁ kiṁ kariṣyati iti atra likhatu.*

यथा – अहं श्वः मैसूरु गमिष्यामि । Aham śvaḥ maisūru gamiṣyāmi. तत्र ______________ । Tatra.........

______________ । ______________ ।

______________ । ______________ ।

______________ । ______________ ।

**12.2**

## विशेषरूपाणि *Viśeṣarūpāṇi*

| | | | |
|---|---|---|---|
| पिबति<br>Pibati | पास्यति<br>Pāsyati | पृच्छति<br>Pṛcchati | प्रक्ष्यति<br>Prakṣyati |
| ददाति<br>Dadāti | दास्यति<br>Dāsyati | त्यजति<br>Tyajati | त्यक्ष्यति<br>Tyakṣyati |
| जानाति<br>Jānāti | ज्ञास्यति<br>Jñāsyati | शक्नोति<br>Śaknoti | शक्ष्यति<br>Śakṣyati |
| शृणोति<br>Śṛṇoti | श्रोष्यति<br>Śroṣyati | उपविशति<br>Upaviśati | उपवेक्ष्यति<br>Upavekṣyati |
| लिखति<br>Likhati | लेखिष्यति<br>Lekhiṣyati | उत्तिष्ठति<br>Uttiṣṭhati | उत्थास्यति<br>Utthāsyati |
| मिलति<br>Milati | मेलिष्यति<br>Meliṣyati | गृह्णाति<br>Gṛhṇāti | ग्रहीष्यति<br>Grahīṣyati |

**13.1**

## सम्बोधनरूपाणि Sambodhanarūpāṇi

रामः, कृष्णः, गोविन्दः, गौरी, मित्रम् - इत्यादीनां सर्वेषां शब्दानां सम्बोधनरूपाणि भिन्नानि भवन्ति । Rāmaḥ, Kṛṣṇaḥ, Govindaḥ, Gaurī, mitram - ityādīnām sarveṣām śabdānām sambodhanarūpāṇi bhinnāni bhavanti.

यथा –

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| रामः | Rāmaḥ | राम ! | Rāma ! | सीता | Sītā | सीते ! | Sīte ! |
| कृष्णः | Kṛṣṇaḥ | कृष्ण ! | Kṛṣṇa ! | रमा | Ramā | रमे ! | Rame ! |
| गोविन्दः | Govindaḥ | गोविन्द ! | Govinda ! | मान्या | Mānyā | मान्ये ! | Mānye ! |
| हरिः | Hariḥ | हरे ! | Hare ! | गौरी | Gaurī | गौरि ! | Gauri ! |
| गुरुः | Guruḥ | गुरो ! | Guro ! | भगिनी | Bhaginī | भगिनि ! | Bhagini ! |
| राजा | Rājā | राजन् ! | Rājan ! | लक्ष्मीः | Lakṣmīḥ | लक्ष्मि ! | Lakṣmi ! |
| महाराजः | Mahārājaḥ | महाराज ! | Mahārāja ! | अम्बा | Ambā | अम्ब ! | Amba ! |
| महोदयः | Mahodayaḥ | महोदय ! | Mahodaya ! | माता | Mātā | मातः ! | Mātaḥ ! |
| पिता | Pitā | पितः ! | Pitaḥ ! | | | | |

## 13.2

*एतस्मिन् सम्भाषणे रिक्तानि स्थलानि आवरणे दत्तानां शब्दानां सम्बोधनरूपैः पूरयतु -*
*Etasmin sambhāṣaṇe riktāni sthalāni āvaraṇe dattānām śabdānām sambodhanarūpaiḥ pūrayatu.*

यथा -

१. मित्र ! भवान् कुत्र गच्छति ? (मित्रम्) Mitra ! Bhavān kutra gacchati ? (mitram)
२. ——— ! अत्र आगच्छतु । (भगिनी) .... ! Atra Āgacchatu. (bhaginī)
३. ——— ! कृपया एतत् पाठयतु । (मान्या) .... ! Kṛpayā etat pāṭhayatu. (mānyā)
४. ——— ! कोलाहलं मा करोतु । (कृष्णः) .... ! Kolāhalam mā karotu. (Kṛṣṇaḥ)
५. ——— ! भवती अपि आगच्छति वा ? (लक्ष्मीः) .... ! Bhavatī api āgacchati vā ? (Lakṣmīḥ)
६. ——— ! आगच्छतु, आपणं गच्छामः । (गौरी) .... ! Āgacchatu, āpaṇam gacchāmaḥ. (Gaurī)
७. ——— ! किञ्चित् सारं परिवेषयतु । (अम्बा) .... ! Kiñcit sāram pariveṣayatu. (ambā)
८. ——— ! भवती किमर्थं किमपि न वदति ? (राधा) .... ! Bhavatī kimartham kimapi na vadati ? (Rādhā)
९. ——— ! दूरे उपविश्य दूरदर्शनं पश्यतु । (लता) .... ! Dūre upaviśya dūradarśanam paśyatu. (Latā)
१०. ——— ! किमर्थं रोदिति भवती ? (नलिनी) .... ! Kimartham roditi bhavatī ? (Nalinī)

## 14.1

# यदि - तर्हि Yadi - Tarhi

*अत्र वाक्यद्वयं लिखितम् अस्ति । 'यदि-तर्हि' इति योजयित्वा एकं वाक्यं कृत्वा लिखतु -*
*Atra vākyadvayam likhitam asti. 'Yadi-Tarhi' iti yojayitvā ekam vākyam kṛtvā likhatu.*

यथा - १) विद्युत् अस्ति । दीपः ज्वलति । Vidyut asti. Dīpaḥ jvalati.
**यदि** विद्युत् अस्ति **तर्हि** दीपः ज्वलति । Yadi vidyut asti tarhi dīpaḥ jvalati.

२) स्नानं न करोति । शरीरं मलिनं भवति । Snānam na karoti. Śarīram malinam bhavati.

___________________________________________ ।

३) कार्यालयस्य विरामः अस्ति । चलनचित्रं पश्यामि । Kāryālayasya virāmaḥ asti. Calanacitram paśyāmi.

___________________________________________ ।

४) आत्मविश्वासः अस्ति । सर्वं सुलभं भवति ।
Ātmaviśvāsaḥ asti. Sarvam sulabham bhavati.

_______________________________________ ।

५) सर्वे सत्कार्यं कुर्वन्ति । देशस्य उन्नतिः भवति ।
Sarve satkāryam kurvanti. Deśasya unnatiḥ bhavati.

_______________________________________ ।

६) मूल्यं न्यूनम् अस्ति । फलानि क्रीणामि । Mulyam nyūnam asti. Phalāni krīṇāmi.

_______________________________________ ।

७) भवती विपणिं गच्छति । अहमपि आगच्छामि ।
Bhavati vipaṇim gacchati. ahamapi āgacchāmi.

_______________________________________ ।

८) भवान् न पठति । परीक्षायाम् उत्तीर्णः न भवति ।
Bhavān na paṭhati. Parīkṣāyām uttīrṇaḥ na bhavati.

_______________________________________ ।

९) छात्राः न सन्ति । कथं पाठं करोमि ? Chātrāḥ na santi. Katham pāṭham karomi ?

_______________________________________ ।

१०) लोकयानं वेगेन न गच्छति । समये तत्र न प्राप्नुमः ।
Lokayānam vegena na gacchati. Samaye tatra na prāpnumaḥ.

_______________________________________ ।

## 15.1 च – एव – इति – अपि

Ca – Eva – Iti – Api

एतत् सम्भाषणं पठतु – *Etat sambhāṣaṇam paṭhatu.*

''भोः मित्र ! कुत्र गच्छति भवान् ?'' "Bhoḥ mitra ! kutra gacchati bhavān ?"

''प्रवासार्थं गच्छामि ।'' "Pravāsārtham gacchāmi."

''के के गच्छन्ति ?'' "Ke ke gacchanti ?"

''अहं, श्रीनिधिः, भास्करः, विमला च गच्छामः । मेखला अपि आगच्छामि इति उक्तवती । सा आगच्छति वा न वा इति न जानामि ।'' "Aham, Śrīnidhiḥ, Bhāskaraḥ, Vimalā ca gacchāmaḥ. Mekhalā api āgacchāmi iti uktavatī.

''सा न आगच्छति एव ।'' "Sā na āgacchati eva."

''भवान् कथं जानाति ?'' "Bhavān katham jānāti ?"

''तस्याः गृहे कोऽपि कार्यक्रमः अस्ति । अतः सा प्रवासार्थम् आगन्तुं न शक्नोति ।''
"Tasyāḥ gṛhe kopi kāryakramaḥ asti. Ataḥ sā pravāsārtham āgantum na śaknoti."

''एवं वा ? कः कार्यक्रमः ?'' "Evam vā ? Kaḥ kāryakramaḥ ?"

''तस्याः भ्रातुः जन्मदिनम् ।'' "Tasyāḥ Bhrātuḥ janmadinam."

''तर्हि सा न आगच्छति एव । वयं गच्छामः ।'' "Tarhi sā na āgacchati eva. Vayam gacchāmaḥ."

**15.2**

एतेषाम् उपयोगं कृत्वा एकं सम्भाषणं लिखतु - *Eteṣām upayogam kṛtvā ekam sambhāṣaṇam likhatu.*

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

**16.1 अ**

## ...... तः ...Taḥ ...... पर्यन्तम् ...Paryantam

अत्र नारायणस्य दिनचर्या लिखिता अस्ति । तां दृष्ट्वा वाक्यानि लिखतु - *Atra Nārāyaṇasya dinacaryā likhitā asti. Tām dṛṣṭvā vākyāni likhatu.*

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ६.०० 6.00 | - | ७.०० 7.00 | योगासनम् Yogāsanam | ५.०० 5.00 | - | ६.०० 6.00 | क्रीडा Krīḍā |
| ७.१५ 7.15 | - | ८.१५ 8.15 | गृहपाठः Gṛhapāṭhaḥ | ६.३० 6.30 | - | ७.३० 7.30 | अध्ययनम् Adhyayanam |
| १०.०० 10.00 | - | ५.०० 5.00 | विद्यालयः Vidyālayaḥ | १०.०० 10.00 | - | ५.०० 5.00 | निद्रा Nidrā |

१. नारायणः ६.०० तः ७.०० पर्यन्तं योगासनं करोति ।
Nārāyaṇaḥ 6.00 taḥ 7.00 paryantam yogāsanam karoti.

२. नारायणः ______ ______ ______ ______ गृहपाठं लिखति ।
Nārāyaṇaḥ ..... ..... gṛhapāṭham likhati.

३. ______ ______ ______ ______ ______ विद्यालये पठति ।
....... vidyālaye paṭhati.

४. ______ ______ ______ ______ ______ क्रीडति ।
...... krīḍati.

५. ______ ______ ______ ______ ______ अध्ययनं करोति ।
....... adhyayanam karoti.

६. ______ ______ ______ ______ ______ निद्रां करोति ।
....... nidrām karoti.

## 16.1 आ

अत्र कर्णाटकमुख्यमन्त्रिणः कार्यक्रमस्य विवरणम् अस्ति । तत् दृष्ट्वा सः कदा कुत्र तिष्ठति इति लिखतु – *Atra Karṇāṭakamukhyamantriṇaḥ kāryakramasya vivaraṇam asti. Tat dṛṣṭvā saḥ kadā kutra tiṣṭhati iti likhatu.*

| | | | | | | |
|---|---|---|---|---|---|---|
| जनवरी | - १ | - | ७ | बेङ्गलूरु | Janavarī - 1 - 7 | Bengalūru |
| " | ८ | - | १३ | मैसूरु | " 8 - 13 | Maisūru |
| " | १४ | - | १७ | धारवाड | " 14 - 17 | Dhāravāḍa |
| " | १८ | - | २० | गुल्बर्ग | " 18 - 20 | Gulbarga |
| " | २१ | - | २४ | कोलार | " 21 - 24 | Kolāra |
| " | २५ | - | ३० | मद्रास् | " 25 - 30 | Madrās |

१. जनवरी १ तः ७ पर्यन्तं मुख्यमन्त्री बेङ्गलूरुनगरे तिष्ठति ।
Janavarī 1 taḥ 7 paryantam mukhyamantrī Bengalūrunagare tiṣṭhati.

२. ______ ______ ______ ______ ______ ______ मैसूरुनगरे तिष्ठति ।
........ Maisūrunagare tiṣṭhati.

३. ______ ______ ______ ______ ______ ______ ______ ______ ।

४. ______ ______ ______ ______ ______ ______ ______ ______ ।

५. ______ ______ ______ ______ ______ ______ ______ ______ ।

६. ______ ______ ______ ______ ______ ______ ______ ______ ।



माला - गोपाल ! भवतः परीक्षा समीपम् आगता अस्ति । **अद्य आरभ्य** प्रतिदिनं पठतु ।
Mala
Gopāla ! Bhavataḥ parīkṣā samīpam āgatā asti. Adya ārabhya pratidinam paṭhatu.

गोपालः - अद्य अहं मित्रस्य[1] गृहं गच्छामि । **श्वः आरभ्य** पठिष्यामि भगिनि !
Gopālaḥ
Adya aham mitrasya gṛham gacchāmi. Śvaha ārabhya paṭhiṣyāmi bhagini !

माला - भवतु । गोपाल ! विद्यालये योगासनकक्ष्या[2] **कदा आरभ्य** भविष्यति ?
Bhavatu. Gopāla ! Vidyālaye yogāsanakakṣyā kadā ārabhya bhaviṣyati ?

गोपालः - **परश्वः आरभ्य** भविष्यति । Paraśvaḥ ārabhya bhaviṣyati.

माला - परश्वः मम अवकाशः न भविष्यति । **प्रपरश्वः आरभ्य** अहमपि योगासनकक्ष्याम्[3] आगमिष्यामि । Paraśvaḥ mama avakāśaḥ na bhaviṣyati. Praparaśvaḥ ārabhya ahamapi yogāsanakakṣyām āgamiṣyāmi.

गोपालः - भगिनि ! मातुलस्य[4] पत्रम् आगतं वा ? bhagini ! mātulasya patram āgatam vā ?

माला - नैव भोः । अहं **परह्यः आरभ्य** तस्य प्रतीक्षां कृतवती । परन्तु न आगतम् एव । Naiva bhoḥ. Aham parahyaḥ ārabhya tasya pratīkṣām kṛtavatī. Parantu na āgatam eva.

*एतस्मिन् सम्भाषणे 1,2,3,4. अत्र रमेशस्य, सङ्गीतकक्ष्या, सङ्गीतकक्ष्याम्, पितृव्यस्य - इति परिवर्तनं कृत्वा सम्भाषणं पुनः लिखतु - Etasmin sambhāṣaṇe 1,2,3,4, atra Rameśasya, saṅgītakakṣyā, saṅgītakakṣyām, pitṛvyasya - iti parivartanaṁ kṛtvā sambhāṣaṇam punaḥ likhatu.*

माला - ________________ ।

गोपालः - ________________ ।

माला - ________________ ।

गोपालः - ________________ ।

माला - ________________ ।

गोपालः - ________________ ।

17.1

## यदा - तदा Yadā -Tadā

१. **यदा** अहं तत्र गतवान् **तदा** सः पठति स्म ।
Yadā aham tatra gatavān tadā saḥ paṭhati sma.

२. **यदा** भवान् बेङ्गलूरु आगमिष्यति **तदा** मम गृहे एव वासं करोतु ।
Yadā bhavān Bengalūru āgamiṣyati tadā mama gṛhe eva vāsam karotu.

३. अहं सज्जः भवामि । **यदा** भवान् आगच्छति **तदा** गच्छामः ।
Aham sajjaḥ bhavāmi. Yadā Bhavān āgacchati tadā gacchāmaḥ.

४. **यदा** वयं काश्मीरं गतवन्तः **तदा** तत्र बहु शैत्यम् आसीत् ।
Yadā vayam Kāśmīram gatavantaḥ tadā tatra bahu śaityam āsīt.

५. **यदा** अहं भवतः गृहम् आगतवान् **तदा** भवान् कुत्र गतवान् आसीत् ?
Yadā aham bhavataḥ gṛham āgatavān tadā bhavān kutra gatavān āsīt ?

६. **यदा** अहं विद्यार्थिनी आसं **तदा** संस्कृतं पठितवती ।
Yadā aham vidyarthinī āsam tadā samskṛtam paṭhitavatī.

*एतादृशानि पञ्च वाक्यानि लिखतु - Etādṛśāni pañca vākyāni likhatu.*

१. ________________ ।

२. ________________ ।

३. ________________ ।

४. ________________ ।

५. ________________ ।

**18.1**

**एकम्, द्वे, त्रीणि, चत्वारि – इत्येतासां लिङ्गभेदः अस्ति । तदनन्तरं लिङ्गभेदः नास्ति ।** Ekam, Dve, Trīṇi, Catvāri - Ityetāsām liṅgabhedaḥ asti. Tadanantaram liṅgabhedaḥ nāsti.

यथा -




एकः बालकः Ekaḥ bālakaḥ
एका बालिका Ekā bālikā
एकं फलम् Ekam phalam




बालकद्वयम् Bālakadvayam
बालिकाद्वयम् Bālikādvayam
फलद्वयम् Phaladvayam




त्रयः बालकाः Trayaḥ bālakāḥ
तिस्रः बालिकाः Tisraḥ bālikāḥ
त्रीणि फलानि Trīṇi phalāni




चत्वारः बालकाः Catvāraḥ bālakāḥ
चतस्रः बालिकाः Catasraḥ bālikāḥ
चत्वारि फलानि Catvāri phalāni




पञ्च बालकाः Pañca bālakāḥ
पञ्च बालिकाः Pañca bālikāḥ
पञ्च फलानि Pañca phalāni



(युतकम्) ________ ।
(Yutakam)



(शुनकः) ________ ।
(Śunakaḥ)



(पिपीलिका) ________ ।
(Pipīlikā)



(गजः) ________ ।
(Gajaḥ)



(सिंहः) ________ ।
(Siṃhaḥ)



(धेनुः) ________ ।
(Dhenuḥ)



(मक्षिका) ________ ।
(Makṣikā)



(गर्दभः) ________ ।
(Gardabhaḥ)



(व्याघ्रः) ________ ।
(Vyāghraḥ)



(अर्धोरुकम्) ________ ।
(Ardhorukam)



(माला) ________ ।
(Mālā)



(ऊरुकम्) ________ ।
(Ūrukam)



(गृहगोधिका) ________ ।
(Gṛhagodhikā)



(चोलः) ________ ।
(Colaḥ)



(शाटिका) ________ ।
(Śāṭikā)



(पादांशुकम्) ________ ।
(Pādāṃśukam)



(शिरस्त्रम्) ________ ।
(Śirastram)



(अन्तर्युतकम्) ________ ।
(Antaryutakam)

## 19.1

चित्राणां साहाय्येन रिक्तस्थलानि पूरयन्तु - *Citrāṇāṃ sāhāyyena riktasthalāni pūrayantu.*

| | | |
|---|---|---|
| | | यथा - |
|  | हस्तः<br>Hastaḥ | सः **हस्तेन** कार्यं करोति ।<br>Saḥ hastena kāryaṃ karoti. |
|  | सीवनयन्त्रम्<br>Sīvanayantram | सा ————— वस्त्रं सीव्यति ।<br>Sā ...... vastram sīvyati. |
|  | लोकयानम्<br>Lokayānam | जनाः ————— प्रयाणं कुर्वन्ति ।<br>Janāḥ ..... prayāṇaṃ kurvanti. |
|  | स्यूतः<br>Syūtaḥ | एषः ————— वस्तूनि आनयति ।<br>Eṣaḥ ..... vastūni ānayati. |
|  | द्विचक्रिका<br>Dvicakrikā | भारती ————— विद्यालयं गच्छति ।<br>Bhāratī ..... vidyālayaṃ gacchati. |
|  | कुञ्चिका<br>Kuñcikā | एषा ————— तालम् उद्घाटयति ।<br>Eṣā ..... tālaṃ udghāṭayati. |
|  | कर्तरी<br>Kartarī | सौचिकः ————— वस्त्रं कर्तयति ।<br>Saucikaḥ ..... vastraṃ kartayati. |
|  | दूरवाणी<br>Dūravāṇī | आपणिकः ————— सम्भाषणं करोति ।<br>Āpaṇikaḥ ..... sambhāṣaṇaṃ karoti. |
|  | अङ्कनी<br>Aṅkanī | बालिका ————— चित्रं लिखति ।<br>Bālikā ..... citraṃ likhati. |

# सह Saha



सः पुत्रेण **सह** आपणं गच्छति ।
Saḥ putreṇa saha āpaṇam gacchati.

सा सख्या **सह** विद्यालयं गच्छति ।
Sā sakhyā saha vidyālayam gacchati



*उदाहरणं दृष्ट्वा तादृशवाक्यानि लिखतु - Udāharaṇam dṛṣṭvā tādṛśavākyāni likhatu*

१. रामः / **रावणः** ----- युद्धं कृतवान् । Rāmaḥ / Rāvaṇaḥ ..... yuddham kṛtavān.
रामः रावणेन सह युद्धं कृतवान् । Rāmaḥ Rāvaṇena saha yuddham kṛtavān.

२. लक्ष्मणः / **रामः** ---- वनं गतवान् । Lakṣmaṇaḥ / Rāmaḥ ..... vanam gatavān.
______________________________________ ।

३. गोपालः / **माधवः** ------ अभ्यासं करोति । Gopālaḥ / Mādhavaḥ ..... abhyāsam kṛtavān.
______________________________________ ।

४. अहं / **मित्रम्** ------ नाटकं पश्यामि । Aham / mitram ..... nāṭakam paśyāmi.
______________________________________ ।

५. एषा / **सीता** ------ तिष्ठति । Eṣā / Sītā ..... tiṣṭhati.
______________________________________ ।

६. सुरेशः / **भगिनी** ------ सम्भाषणं करोति । Sureśaḥ / bhaginī ..... sambhāṣaṇam karoti.
______________________________________ ।

७. माता / **पुत्री** ------ कार्यं करोति । Mātā / Putrī ..... kāryam karoti.
______________________________________ ।

८. अध्यापकः / **छात्राः** ------ प्रवासार्थं गतवान् । Adhyāpakaḥ / Chātrāḥ ..... pravāsārtham gatavān.
______________________________________ ।

९. लता / **सख्यः** ------ क्रीडति । Latā / Sakhyaḥ ..... krīḍati.
______________________________________ ।

| | |
|---|---|
| **छात्रेण** Chātreṇa – **छात्रैः** Chātraiḥ | **मित्रेण** Mitreṇa – **मित्रैः** Mitraiḥ |
| **बालिकया** Bālikayā – **बालिकाभिः** Bālikābhiḥ | **सख्या** Sakhyā – **सखीभिः** Sakhībhiḥ |

19.2 आ

एतेषु वाक्येषु पदानि अव्यवस्थितानि सन्ति । तानि व्यवस्थितानि लिखतु - *Eteṣu vākyeṣu padāni avyavasthitāni santi. Tāni vyavasthitāni likhatu*

यथा - १. करोति सह दिनेशः मित्रैः प्रतिदिनं अभ्यासं ।
Karoti saha Dineśaḥ mitraiḥ pratidinaṃ abhyāsaṃ.

**दिनेशः प्रतिदिनं मित्रैः सह अभ्यासं करोति ।**
Dineśaḥ pratidinaṃ mitraiḥ saha abhyāsaṃ karoti.

२. आगतवान् सह कः भवता ? Āgatavān saha kaḥ bhavatā ?

_______________________________________ ।

३. कलहं सः सह करोति सर्वैः । Kalahaṃ saḥ saha karoti sarvaiḥ.

_______________________________________ ।

४. आगच्छामि वा अहम् अपि सह भवत्या ? Āgacchāmi vā aham api saha bhavatyā ?

_______________________________________ ।

५. युद्धं सैनिकः सह करोति शत्रुभिः । Yuddhaṃ sainikaḥ saha karoti śatrubhiḥ.

_______________________________________ ।

६. करोति वैद्यः सह रोगिभिः सम्भाषणं । Karoti vaidyaḥ saha rogibhiḥ sambhāṣaṇaṃ.

_______________________________________ ।

७. ललिता सह कृतवती चर्चां अध्यापिकाभिः । Lalitā saha kṛtavatī carcāṃ adhyāpikābhiḥ.

_______________________________________ ।

19.3

## विना Vinā

उदाहरणं दृष्ट्वा अन्यवाक्यानि लिखतु - *Udāharaṇaṃ dṛṣṭvā anyavākyāni likhatu.*

-------- -------- जीवनं कठिनम् । ...... jīvanaṃ kaṭhinaṃ.
-------- -------- वाहनं न चलति । ...... vāhanaṃ na calati.
-------- -------- अहं विद्यालयं न गच्छामि । ...... ahaṃ vidyālayaṃ na gacchāmi.

------ ------ ------ ------ ------ ------ ------ ।
------ ------ ------ ------ ------ ------ ------ ।

विशेषसूचना - जलं विना मीनः न जीवति इत्येतादृशः प्रयोगः अपि शुद्धः एव ।
Viśeṣasūcanā - Jalaṃ vinā mīnaḥ na jīvati ityetādṛśaḥ prayogaḥ api śuddhaḥ eva.

20.1 अ

# अद्यतन Adyatana – श्वस्तन Śvastana – ह्यस्तन Hyastana

एतत् सम्भाषणं पठतु – *Etat sambhāṣaṇam paṭhatu.*



''अद्य परीक्षा आसीत् वा ?''
''Adya parīkṣā āsīt vā ?''

''आम्, आसीत् ।'' ''Ām, āsīt.''

''अद्यतनप्रश्नपत्रिका कथम् आसीत् ?''
''Adyatana-praśnapatrikā katham āsīt ?''

''अद्यतनप्रश्नपत्रिका सरला आसीत् ।
ह्यस्तनप्रश्नपत्रिका तु कठिना आसीत् ।''
''Adyatana-praśnapatrikā saralā āsīt.
Hyastana-praśnapatrikā tu kaṭhinā āsīt.''

''श्वस्तनपरीक्षार्थम् अभ्यासं कृतवान् वा भवान् ?'' ''Śvastanaparīkṣārtham abhyāsam kṛtavān vā bhavān ?''

''आम्, किञ्चित् कृतवान् ।'' ''Ām, kiñcit kṛtavān.''

20.1 आ

एतत् सम्भाषणं चिन्तयित्वा लिखतु – *Etat sambhāṣaṇam cintayitvā likhatu.*



''अद्यतनपत्रिकां पठितवान् वा ?''
''Adyatanapatrikām paṭhitavān vā ?''

''न, कः विशेषः अस्ति ?''
''Na, kaḥ viśeṣaḥ asti ?''

''_______________________
_____________________ ।''

''_______________________
_____________________ ।''

''_______________________
_____________________ ।''

''_____________________________________________ ।''

21.1

## गत – आगामि Gata - Agāmi

| | | |
|---|---|---|
| गत – Gata | मासे Māse<br>दिने Dine<br>सप्ताहे Saptāhe<br>वर्षे Varṣe | निर्वाचनम् आसीत् । Nirvācanam āsīt.<br>————————— ।<br>मम गृहे अतिथिः आसीत् । Mama gṛhe atithiḥ āsīt.<br>————————————— । |
| आगामि – Agāmi | वर्षे Varṣe<br>मासे Māse<br>सप्ताहे Saptāhe<br>पर्वदिने Parvadine | ————————————— ।<br>मम मित्रम् आगमिष्यति । Mama mitram āgamiṣyati<br>————————————— ।<br>————————————— । |

कोष्ठकस्य साहाय्येन वाक्यानि लिखतु - Koṣṭhakasya sāhāyyena vākyāni likhatu

उदा - १. गतमासे निर्वाचनम् आसीत् । Gatamāse nirvācanam āsīt.

२. आगामिवर्षे मम मित्रम् आगमिष्यति । Āgamivarṣe mama mitram āgamiṣyati.

३. ----- ----- ----- ----- ----- ----- ।

४. ----- ----- ----- ----- ----- ----- ।

५. ----- ----- ----- ----- ----- ----- ।

६. ----- ----- ----- ----- ----- ----- ।

७. ----- ----- ----- ----- ----- ----- ।

८. ----- ----- ----- ----- ----- ----- ।

22.1

## यावत् – तावत् Yāvat - Tāvat

एतानि वाक्यानि पूर्णानि करोतु - Etāni vākyāni pūrṇāni karotu

उदा - नद्यां **यावत्** जलम् अस्ति **तावत्** सरोवरे नास्ति ।
Nadyām yāvat jalam asti tāvat sarovare nāsti.

१. कर्णाटकं **यावत्** विशालं, केरलं **तावत्** विशालं नास्ति ।
Karṇāṭakam yāvat viśālam, Keralam tāvat viśālam nāsti.

२. एषा **यावत्** कार्यं करोति ———————————— ।
Eṣā Yāvat kāryam karoti ...........

३. भीमस्य **यावत्** धैर्यम् अस्ति ———————————— ।
Bhīmasya yāvat dhairyam asti ...........

४. सः यावत् वदति ________________________ ।
Sah Yāvat vadati ....................

५. मम भगिनी यावत् पठति ________________________ ।
Mama bhaginī yāvat paṭhati ....................

६. अहं मधुरं यावत् इच्छामि ________________________ ।
Aham madhuram yāvat icchāmi ....................

७. सुधा यावत् क्रीडति ________________________ ।
Sudhā yāvat krīḍati ....................

23.1

## यथा - तथा Yathā - Tathā

*उदाहरणं दृष्ट्वा अनन्तरवाक्येषु रिक्तानि स्थलानि उचितैः शब्दैः पूरयत् - Udāharaṇam dṛṣṭvā anantaravākyeṣu riktāni sthalāni ucitaiḥ śabdaiḥ pūrayata.*

उदा - **यथा** सचिन् तेण्डुल्कर् क्रीडति **तथा** अहं न क्रीडामि ।
Yathā Sacin teṇḍulkar krīḍati tathā aham na krīḍāmi.

**यथा** भीमसेनजोशी गायति **तथा** अन्यः न गायति ।
Yathā Bhīmasenajośī gāyati tathā anyaḥ na gāyati.

__________ कालिदासः काव्यं लिखितवान् __________ ।
.......... Kālidāsaḥ kāvyam likhitavān ..........

__________ रविवर्मा चित्रं __________ ।
.......... Ravivarmā citram ..........

__________ मम मित्रं गायति __________ ।
.......... mama mitram gāyati ..........

__________ भवान् पाठयति __________ ।
.......... Bhavān pāṭhayati ..........

__________ सः उपन्यासं करोति __________ ।
.......... saḥ upanyāsam karoti ..........

__________ मम अध्यापकः संस्कृतं जानाति __________ ।
.......... mama adhyāpakaḥ saṁskṛtam jānāti ..........

## स्म Sma



सुन्दरेशः बन्धुगृहं गत्वा आगतवान् ।
Sundareśaḥ bandhugṛham gatvā āgatavān.

तत्र कः कः किं करोति स्म इति सः मातरं वदति -
Tatra kaḥ kaḥ kim karoti sma iti saḥ mātaram vadati -



१. मातामहः ध्यानं करोति स्म । Mātāmahaḥ dhyānam karoti sma.
२. मातुलानी --- --- --- --- --- । Mātulānī.........
३. मातुलः --- --- --- --- --- । Mātulaḥ .........
४. रमा --- --- --- --- --- । Ramā...............
५. सुधा --- --- --- --- --- । Sudhā ..............
६. रमेशः --- --- --- --- --- । Rameśaḥ ..........
७. लीला --- --- --- --- --- । Līlā ..................
८. मातामही --- --- --- --- --- । Mātāmahī .........

# क्त्वा Ktvā

१. सः शालां गच्छति, पाठं पठति । Saḥ śālām gacchati, pāṭham paṭhati.
   सः शालां गत्वा पाठं पठति । Saḥ śālām gatvā pāṭham paṭhati.

२. ते कार्यं कुर्वन्ति, श्रान्ताः भवन्ति । Te kāryam kurvanti, śrāntāḥ bhavanti.
   ________________________________ ।

३. शिशुः क्रीडाङ्गणे पतति, रोदनं करोति । Śiśuḥ krīḍāṅgaṇe patati, rodanam karoti.
   ________________________________ ।

४. अहं फलं खादितवान्, जलं पीतवान् । Aham phalam khāditavān, jalam pītavān.
   ________________________________ ।

५. किञ्चित् पानीयं पिबतु, अनन्तरं गच्छतु । Kiñcit pānīyam pibatu, anantaram gacchatu.
   ________________________________ ।

६. सा पत्रं लिखितवती, प्रेषितवती । Sā patram likhitavatī, preṣitavatī.
   ________________________________ ।

७. भवन्तः वार्तां शृण्वन्ति । विषयं जानन्ति । Bhavantaḥ vārtām śṛṇvanti. Viṣayam jānanti.
   ________________________________ ।

८. वयं नाटकं पश्यामः । गृहम् आगच्छामः । Vayam nāṭakam paśyāmaḥ. Gṛham āgacchāmaḥ.
   ________________________________ ।

९. ताः बालिकाः विषयं स्मरन्ति, सम्यक् लिखन्ति । Tāḥ bālikāḥ viṣayam smaranti, samyak likhanti.
   ________________________________ ।

25.2

## विशेषरूपाणि Viśeṣarūpāṇi

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ददाति | - | दत्त्वा | अस्ति | - | भूत्वा | पृच्छति | - | पृष्ट्वा |
| Dadāti | - | Dattvā | Asti | - | Bhūtvā | pṛcchati | - | pṛṣṭvā |
| गृह्णाति | - | गृहीत्वा | रोदिति | - | रुदित्वा | उपविशति | - | उपविश्य |
| Gṛhṇāti | - | Gṛhītvā | Roditi | - | Ruditvā | Upaviśati | - | Upaviśya |
| प्रक्षालयति | - | प्रक्षाल्य | उत्तिष्ठति | - | उत्थाय | आनयति | - | आनीय |
| Prakṣālayati | - | Prakṣālya | Uttiṣṭhati | - | Utthāya | Ānayati | - | Ānīya |
| आगच्छति | - | आगत्य | स्वीकरोति | - | स्वीकृत्य | आह्वयति | - | आहूय |
| Āgacchati | - | Āgatya | Svīkaroti | - | Svīkṛtya | Āhvayati | - | Āhūya |




नारायणः गोविन्दस्य गौतम्याः च **पुत्रः** । Nārāyaṇaḥ Govindasya Gautamyāḥ ca putraḥ.

लता नरसिंहस्य गिरिजाम्बायाः च **पुत्री** । (दुहिता) Latā Narasiṁhasya Girijāmbāyāḥ ca putrī. (Duhitā)

नारायणः केशवस्य सुमायाः च **पिता** । Nārāyaṇaḥ Keśavasya Sumāyāḥ ca pitā.

लता केशवस्य सुमायाः च **माता** । Latā Keśavasya Sumāyāḥ ca mātā.

केशवः गोविन्दस्य गौतम्याः च **पौत्रः** । Keśavaḥ Govindasya Gautamyāḥ ca pautraḥ.

सुमा गोविन्दस्य गौतम्याः च **पौत्री** । Sumā Govindasya Gautamyāḥ ca pautrī.

केशवः नरसिंहस्य गिरिजाम्बायाः च दौहित्रः । Keśavaḥ Narasiṁhasya Girijāmbāyāḥ ca dauhitraḥ.

सुमा नरसिंहस्य गिरिजाम्बायाः च दौहित्री । Sumā Narasiṁhasya Girijāmbāyāḥ ca dauhitrī.

गोविन्दः केशवस्य सुमायाः च पितामहः । Govindaḥ Keśavasya Sumāyāḥ ca pitāmahaḥ.

गौतमी केशवस्य सुमायाः च पितामही । Gautami Keśavasya Sumāyāḥ ca mātāmahaḥ.

नरसिंहः केशवस्य सुमायाः च मातामहः । Narasiṁhaḥ Keśavasya Sumāyāḥ ca mātāmahaḥ.

गिरिजाम्बा केशवस्य सुमायाः च मातामही । Girijāmbā Keśavasya Sumāyāḥ ca mātāmahi.

नारायणः नरसिंहस्य गिरिजाम्बायाः च जामाता । (पुत्र्याः पतिः) Nārāyaṇaḥ Narasiṁhasya Girijāmbāyāḥ ca Jāmātā. (Putryāḥ patiḥ)

लता गोविन्दस्य गौतम्याः च स्नुषा । (पुत्रस्य पत्नी) Latā Govindasya Gautamyāḥ ca snuṣā. (Putrasya patnī)

गोविन्दः लतायाः श्वशुरः । गौतमी लतायाः श्वश्रूः । Govindaḥ Latāyāḥ śvaśuraḥ. Gautamī Latāyāḥ śvaśrūḥ.

नरसिंहः नारायणस्य श्वशुरः । गिरिजाम्बा नारायणस्य श्वश्रूः । Narasiṁhaḥ Nārāyaṇasya śvaśuraḥ.

## 26.2

*एतानि वाक्यानि पठतु – Etāni vākyāni paṭhatu.*

> उमानाथः वित्तकोषे अधिकारी । तस्य पिता वीरभद्रः, माता इन्दिरा । उमानाथः शालिनीं परिणीतवान् । शालिन्याः पिता जगदीशः, माता पुष्पा । उमानाथस्य पुत्री सुधा, पुत्रः प्रभाकरः । Umānāthaḥ vittakoṣe adhikārī. Tasya pitā Vīrabhadraḥ, mātā Indirā. Umānāthaḥ śālinīṁ pariṇītavān. Śālinyāḥ pitā Jagadīśaḥ, mātā Puṣpā. Umānāthasya putrī Sudhā, putraḥ Prabhākaraḥ.

*रिक्तस्थलानि उचितैः शब्दैः पूरयतु – Riktasthalāni ucitaiḥ śabdaiḥ pūrayatu.*

१. उमानाथः वीरभद्रस्य -------- । Umānāthaḥ Vīrabhadrasya.......

२. उमानाथः प्रभाकरस्य -------- । Umānāthaḥ Prabhākarasya ........

३. प्रभाकरः वीरभद्रस्य -------- । Prabhākaraḥ Vīrabhadrasya ........

४. ---------- -------- पितामहः । ........... pitāmahaḥ.

५. ---------- -------- दौहित्रः । ........... dauhitraḥ.

६. ---------- -------- मातामहः । ........... mātāmahaḥ.

26.3

### अन्ये केचन बन्धुवाचकाः शब्दाः Anye kecana bandhuvācakāḥ śabdāḥ

| | | | |
|---|---|---|---|
| मातुलः<br>Mātulaḥ | - मातुः भ्राता<br>Mātuḥ bhrātā | पितृव्यः<br>Pitṛvyaḥ | - पितुः भ्राता<br>Pituḥ bhrātā |
| मातुलानी<br>Mātulānī | - मातुलस्य पत्नी<br>Mātulasya patnī | पितृभगिनी<br>Pitṛbhaginī | - पितुः भगिनी<br>Pituḥ bhaginī |
| भागिनेयः<br>Bhāgineyaḥ | - भगिन्याः पुत्रः<br>Bhaginyāḥ putraḥ | श्यालः<br>Śyālaḥ | - पत्न्याः भ्राता<br>Patnyāḥ bhrātā |
| भागिनेयी<br>Bhāgineyī | - भगिन्याः पुत्री<br>Bhaginyāḥ putrī | देवरः<br>Devaraḥ | - पत्युः भ्राता<br>Patyuḥ bhrātā |
| ननान्दा<br>Nanāndā | - पत्युः भगिनी<br>Patyuḥ bhaginī | आवुत्तः<br>Āvuttaḥ | - भगिन्याः पतिः<br>Bhaginyāḥ patiḥ |

27.1 अ

## रुचिवाचकाः शब्दाः Rucivācakāḥ śabdāḥ

| | | |
|---|---|---|
|  | लवणम्<br>Lavaṇam | लवणस्य रुचिः लवणः ।<br>Lavaṇasya ruciḥ lavaṇaḥ. |
|  | जम्बीरम्<br>Jambīram | जम्बीरस्य रुचिः आम्लः ।<br>Jambīrasya ruciḥ āmlaḥ. |
|  | चाकलेहः<br>Cākalehaḥ | चाकलेहस्य रुचिः मधुरः ।<br>Cākalehasya ruciḥ madhuraḥ. |
|  | मरीचिका<br>Marīcikā | मरीचिकायाः रुचिः कटुः ।<br>Marīcikāyāḥ ruciḥ kaṭuḥ. |
|  | कारवेल्लम्<br>Kāravellam | कारवेल्लस्य रुचिः तिक्तः ।<br>Kāravellasya ruciḥ tiktaḥ. |
|  | आमलकम्<br>Āmalakam | आमलकस्य रुचिः कषायः ।<br>Āmalakasya ruciḥ kaṣāyaḥ. |

## 27.1 आ

*एतानि वाक्यानि पठतु । अशुद्धानि वाक्यानि शुद्धानि करोतु – Etāni vākyāni paṭhatu. Aśuddhāni vākyāni śuddhāni karotu.*

| | | | |
|---|---|---|---|
| यथा – | गुडस्य रुचिः कटुः । ✗ | | Guḍasya ruciḥ kaṭuḥ. |
| | न, गुडस्य रुचिः मधुरः । | | Na, guḍasya ruciḥ madhuraḥ. |
| १. | मरीचिकायाः रुचिः मधुरः । | –– | Marīcikāyāḥ ruciḥ madhuraḥ. |
| | ________________________ । | | |
| २. | आम्रफलस्य रुचिः तिक्तः । | –– | Āmraphalasya ruciḥ tiktaḥ. |
| | ________________________ । | | |
| ३. | अवलेहस्य रुचिः मधुरः । | –– | Avalehasya ruciḥ madhuraḥ. |
| | ________________________ । | | |
| ४. | तिन्त्रिण्याः रुचिः कटुः । | –– | Tintriṇyāḥ ruciḥ kaṭuḥ. |
| | ________________________ । | | |

## 27.2

*एतत् सम्भाषणं पठतु – Etat sambhāṣaṇam paṭhatu.*

पुत्रः – अम्ब ! किम् अद्य क्वथितं बहु **कटु** अस्ति !
Putraḥ – Amba ! kim adya kvathitam bahu kaṭu asti !

माता – तर्हि क्वथितं मा स्वीकरोतु । तक्रं परिवेषयामि ।
Mātā – Tarhi kvathitam mā svīkarotu. Takram pariveṣayāmi.

पुत्रः – तक्रं बहु **आम्लम्** अस्ति अम्ब ! Takram bahu āmlam asti amba !

माता – भवान् तु केवलं **मधुरम्** इच्छति । एतत् मोदकं खादतु । बहु **मधुरम्** अस्ति ।
Bhavān tu kevalam madhuram icchati. Etat modakam khādatu. bahu madhuram asti.

पुत्रः – सत्यम् अम्ब ! एतत् **मधुरम्** अस्ति । Satyam amba ! Etat madhuram asti.

माता – कारवेल्लस्य व्यञ्जनम् अस्ति । किञ्चित् परिवेषयामि वा ?
Kāravellasya vyañjanam asti. Kiñcit pariveṣayāmi vā ?

पुत्रः – मास्तु अम्ब, कारवेल्लं **तिक्तं** भवति । अहं **तिक्तं** न इच्छामि । किञ्चित् लवणं परिवेषयतु । Māstu amba, kāravellam tiktam bhavati. Aham tiktam na icchāmi. Kiñcit lavaṇam pariveṣayatu.

माता – स्वीकरोतु । आमलकस्य अवलेहं किञ्चित् परिवेषयामि वा ?
Svīkarotu. Āmalakasya avaleham kiñcit pariveṣayāmi vā ?

पुत्रः – अस्तु, परिवेषयतु । अम्ब, आमलकस्य रुचिः **कषायः** अस्ति ।
Astu, pariveṣayatu. Amba, āmalakasya ruciḥ kaṣāyaḥ asti.

माता – तर्हि जम्बीरस्य अवलेहं स्वीकरोतु । Tarhi jambīrasya avaleham svīkarotu.

पुत्रः – स तु **आम्लः** अस्ति अम्ब । Sa tu āmlaḥ asti amba.

माता – भवान् तु **मधुरम्** एकमेव इच्छति । परन्तु शरीरस्य वर्धनार्थं सर्वविधाः रुचयः अपि आवश्यिकाः एव । Bhavān tu madhuram ekameva icchati. parantu śarīrasya vardhanārtham sarvavidhāḥ rucayaḥ api āvaśyikāḥ eva.

27.3

एतेषाम् उत्तरं लिखतु - *Eteṣām uttaram likhatu*

१. क्वथितं कथम् अस्ति ? ______________________ ।
Kvathitam katham asti ?

२. तक्रं कथम् अस्ति ? ______________________ ।
Takram katham asti ?

३. किं तिक्तं भवति ? ______________________ ।
Kim tiktam bhavati ?

४. आमलकस्य रुचिः का ? ______________________ ।
Āmalakasya ruciḥ kā ?

५. भवान् किम् इच्छति ? ______________________ ।
Bhavān kim icchati ?

६. गुडस्य रुचिः का ? ______________________ ।
Guḍasya ruciḥ kā ?

28.1



आपणिकः Āpaṇikaḥ - भवती किम् इच्छति ? Bhavatī kim icchati ?

रमा Ramā - अहं पाञ्चालिकाम् इच्छामि । Aham pāñcālikām icchāmi.

आपणिकः - **कीदृश** पाञ्चालिकाम् इच्छति ? Kīdṛśapāñcālikām icchati.

रमा - पश्यतु, **ईदृश** पाञ्चालिकाम् इच्छामि । अस्ति वा ?
Paśyatu, Īdṛśapāñcālikām icchāmi. Asti vā ?

आपणिकः - अस्ति, परन्तु **तादृश** पाञ्चालिकायाः मूल्यं २० रूप्यकाणि ।
Asti, parantu tādṛśapāñcālikāyāḥ mūlyaṃ 20 rūpyakāṇi.

रमा - दर्शयतु भोः ! *(आपणिकः दर्शयति)* Darśayatu bhoḥ !
किं भोः ! मम सखी अपि ह्यः **ईदृश** पाञ्चालिकाम् एव क्रीतवती । तस्याः मूल्यं तु १० रूप्यकाणि एव । Kiṃ bhoḥ ! mama sakhī api hyaḥ īdṛśapāñcālikām eva krītavatī. Tasyāḥ mūlyaṃ tu 10 rūpyakāṇi eva.

आपणिकः - प्रायः सा पाञ्चालिका **ईदृश** पाञ्चालिका न स्यात् ।
Prāyaḥ sā pāñcālikā īdṛśapāñcālikā na syāt.

रमा - **ईदृश** पाञ्चालिका एव भोः, अहं सम्यक् जानामि । Īdṛśapāñcālikā eva bhoḥ !, ahaṃ samyak jānāmi.

आपणिकः - तर्हि पञ्चदश रूप्यकाणि ददातु । नयतु । Tarhi pañcadaśa rūpyakāṇi dadātu. Nayatu.

रमा - न... न... । पञ्चदश रूप्यकाणि अधिकानि । अहं तु दश रूप्यकाणि ददामि ।
Na... Na... Pañcadaśa rūpyakāṇi adhikāni. Ahaṃ tu daśa rūpyakāṇi dadāmi.

आपणिकः - भवतु, पाञ्चालिकां स्वीकरोतु । Bhavatu, pāñcālikāṃ svīkarotu.

| विशेषसूचना Viśeṣasūcanā | |
|---|---|
| ईदृश - Īdṛśa | ईदृशः स्यूतः । Īdṛśaḥ syūtaḥ.<br>ईदृशी घटी । Īdṛśī ghaṭī.<br>ईदृशं पुस्तकम् । Īdṛśaṃ pustakaṃ. |

## 28.2

*पूर्वतनसम्भाषणे 'पाञ्चालिका' शब्दस्य स्थाने 'लेखनी' इति शब्दं योजयित्वा सम्भाषणं पुनः लिखतु* - *Pūrvatanasambhāṣaṇe 'pāñcālikā' śabdasya sthāne 'lekhanī' iti śabdaṃ yojayitvā sambhāṣaṇaṃ punaḥ likhatu.*

यथा - आपणिकः - भवती किम् इच्छति ? Bhavatī kiṃ icchati ?
रमा - अहं लेखनीम् इच्छामि । Ahaṃ lekhanīṃ icchāmi.
आपणिकः - ______________________________ ।
रमा - ______________________________ ।
आपणिकः - ______________________________ ।
रमा - ______________________________ ।
आपणिकः - ______________________________ ।
रमा - ______________________________ ।

29.1

## विरुद्धार्थकाः शब्दाः Viruddhārthakāḥ śabdāḥ

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| उन्नत | Unnata | - | वामन | Vāmana | दीर्घ | Dīrgha | - | ह्रस्व | Hrasva |
| पुरातन | Purātana | - | नूतन | Nūtana | स्थूल | Sthūla | - | कृश | Kṛśa |
| बृहत् | Bṛhat | - | लघु | Laghu | अधिकम् | Adhikam | - | किञ्चित् | Kiñcit |

उपरि केचन विरुद्धार्थकाः शब्दाः सन्ति । अधस्तनवाक्येषु स्थितानि रिक्तस्थलानि उचितैः विरुद्धार्थकशब्दैः पूरयतु –*Upari kecana viruddhārthakāḥ śabdāḥ santi. Adhastanavākyeṣu sthitāni riktasthalāni ucitaiḥ viruddhārthakaśabdaiḥ pūrayatu.*



नालिकेरवृक्षः ________________ अस्ति ।
Nālikeravṛkṣaḥ ............ asti.

जम्बीरवृक्षः ________________ अस्ति ।
Jambīravṛkṣaḥ ............ asti.



'अ' दण्डः ________________ अस्ति ।
'A' daṇḍaḥ ............ asti.

'ब' दण्डः ________________ अस्ति ।
'Ba' daṇḍaḥ ............ asti.



युतकं ________________ अस्ति ।
Yutakam ............ asti.

पुस्तकं ________________ अस्ति ।
Pustakam ............ asti.



गोविन्दः ________________ बालकः ।
Govindaḥ ............ bālakaḥ.

समीरः ________________ बालकः ।
Samīraḥ ............ bālakaḥ.



विधानसौधं ________________ भवनम् ।
Vidhānasaudham ............ bhavanam.

सन्दीपस्य गृहं ________________ गृहम् ।
Sandīpasya gṛham ............ gṛham.



द्रोण्यां ________________ जलम् अस्ति ।
droṇyām ............ jalam asti.

चषके ________________ क्षीरम् अस्ति ।
Caṣake ............ kṣīram asti.

| विशेषसूचना Viśeṣasūcanā | | | |
|---|---|---|---|
| स्थूल - Sthūla - | बालकः स्थूलः Bālakaḥ sthūlaḥ | बालिका स्थूला Bālikā sthūlā | पुस्तकं स्थूलम् Pustakaṁ sthūlam |
| नूतन - Nūtana - | ग्रन्थः नूतनः Granthaḥ nūtanaḥ | लेखनी नूतना Lekhanī nūtanā | युतकं नूतनम् Yutakaṁ nūtanam |

**30.1**

## अपेक्षया Apekṣayā

*आवरणे विद्यमानस्य पदस्य साहाय्येन वाक्यानि लिखतु - Āvaraṇe vidyamānasya padasya sāhāyyena vākyāni likhatu.*

उदा - विजयस्य अपेक्षया विनयः उन्नतः । (विजयः)
Vijayasya apekṣayā Vinayaḥ unnataḥ. (Vijayaḥ)

१. ———— ———— समीरः चतुरः । (मधुसूदनः)
.............. Samīraḥ caturaḥ. (Madhusūdanaḥ)

२. ———— ———— रामायणं बृहत् काव्यम् । (रघुवंशः)
.............. rāmāyaṇaṁ bṛhat kāvyam. (Raghuvaṁśaḥ)

३. मम ———— ———— भवतः गृहं विशालम् । (गृहम्)
Mama .............. bhavataḥ gṛhaṁ viśālam. (Gṛham)

४. बेङ्गलूरु ———— ———— मैसूरुनगरं सुन्दरम् । (नगरम्)
Beṅgalūru .............. Maisūrunagaraṁ sundaram. (Nagaram)

५. ———— ———— भाषणं सुलभम् । (लेखनम्)
.............. bhāṣaṇaṁ sulabham. (Lekhanam)

६. ———— ———— अपर्णा कृशा । (उमा)
.............. Aparṇā kṛśā. (Umā)

**30.2 अ**

## यत्र - तत्र Yatra - Tatra

*एतेषां पदानां साहाय्येन अन्यानि वाक्यानि लिखतु - Eteṣāṁ padānāṁ sāhāyyena anyāni vākyāni likhatu.*

यथा - शर्करा - पिपीलिकाः — यत्र शर्करा तत्र पिपीलिकाः भवन्ति ।
Śarkarā - Pipīlikāḥ — Yatra śarkarā tatra pipīlikāḥ bhavanti.

दीपः - प्रकाशः — ———————————— ।
Dīpaḥ - Prakāśaḥ

क्रीडा - बालकाः ——————————————————— ।
Krīḍā - bālakāḥ

विदूषकः - विनोदः ——————————————————— ।
Vidūṣakaḥ - Vinodaḥ

आपणः - ग्राहकः ——————————————————— ।
Āpaṇaḥ - Grāhakaḥ

**30.2 आ**

*द्वितीयं वाक्यं पठित्वा तत्सम्बद्धं प्रथमवाक्यं लिखतु – Dvitīyam vākyam paṭhitvā tatsambaddham prathamavākyam likhatu.*

यथा – यत्र भवान् गच्छति तत्र अहमपि आगच्छामि ।
Yatra bhavān gacchati tatra ahamapi āgacchāmi.

१. ——————————————— भवान् अपि क्रीडतु ।
.................. bhavān api krīḍatu.

२. ——————————————— भवती मा गच्छतु ।
.................. bhavatī mā gacchatu.

३. ——————————————— सर्वे अपि गच्छन्ति ।
.................. sarve api gacchanti.

४. ——————————————— वासं मा करोतु ।
.................. vāsaṃ mā karotu.

**31.1**

## तुमुन् Tumun

*आवरणे विद्यमानस्य क्रियापदस्य उचितं रूपम् उदाहरणवाक्ये इव लिखतु – Āvaraṇe vidyamānasya kriyāpadasya ucitam rūpam udāharaṇavākye iva likhatu.*

उदा – १. रमेशः क्रीडितुं (क्रीडति) क्रीडाङ्गणं गच्छति ।
Rameśaḥ krīḍitum (krīḍati) krīḍāṅganam gacchati.

२. उमेशः वस्तूनि —————— (आनयति) आपणं गतवान् । Umeśaḥ vastūni ...... (Ānayati) āpaṇam gatavān.

३. अहं —————— (लिखति) लेखनीम् आनीतवती । Aham ...... (Likhati) lekhanīm ānītavatī.

४. जनाः नाटकं —————— (पश्यति) इच्छन्ति । Janāḥ nāṭakam ...... (Paśyati) icchanti.

५. सः अस्वस्थः । अतः कार्यं ————— (करोति) न शक्नोति । Saḥ asvasthaḥ. Ataḥ kāryam .....(Karoti) na śaknomi.

६. सङ्गीतं -------- (शृणोति) भवान् कुत्र गच्छति ? Sangītam ...... (Śrnoti) bhavān kutra gacchati ?

७. जलं -------- (पिबति) चषकः आवश्यकः । Jalam ...... (Pibati) casakah āvaśyakah.

### विशेषरूपाणि Viśeṣarūpāṇi

| | | | | | |
|---|---|---|---|---|---|
| उपविशति<br>Upaviśati | - | उपवेष्टुम्<br>Upavestum | उत्तिष्ठति<br>Uttiṣṭhati | - | उत्थातुम्<br>Utthātum |
| अस्ति/भवति<br>Asti / Bhavati | - | भवितुम्<br>Bhavitum | क्रीणाति<br>Krīṇāti | - | क्रेतुम्<br>Kretum |
| गृह्णाति<br>Gṛhṇāti | - | ग्रहीतुम्<br>Grahitum | पिबति<br>pibati | - | पातुम्<br>Pātum |
| आह्वयति<br>Āhvayati | - | आह्वातुम्<br>Āhvātum | मिलति<br>Milati | - | मेलितुम्<br>Melitum |

## 31.2 परिवर्तनाभ्यासः (क्त्वातः तुमुन्)

**Parivartanābhyāsaḥ (Ktvātaḥ tumun)**

कपिलः ग्रन्थालयं गत्वा ग्रन्थं पठति । Kapilaḥ granthālayam gatvā grantham paṭhati.

कपिलः ग्रन्थं पठितुं ग्रन्थालयं गच्छति । Kapilaḥ grantham paṭhitum granthālayam gacchati.

*एतेन क्रमेण अन्यानि वाक्यानि परिवर्तयतु - Etena kramena anyāni vākyāni parivartayatu.*

१. गौरी सखीगृहं गत्वा पुस्तकम् आनयति । Gauri sakhīgṛham gatvā pustakam ānayati.

---------------------------------------- ।

२. चित्रकारः चित्रं लिखित्वा धनं सम्पादयति । Citrakārah citram likhitvā dhanam sampādayati.

---------------------------------------- ।

३. बालिका सम्यक् पठित्वा उत्तीर्णा भवति । Bālikā samyak paṭhitvā uttīrṇā bhavati.

---------------------------------------- ।

४. एषः स्नानं कृत्वा शुद्धः भवति । Esaḥ snānam kṛtvā śuddhaḥ bhavati.

---------------------------------------- ।

५. सम्यक् विचारं कृत्वा कार्यं करोतु । Samyak vicāram kṛtvā kāryam karotu.

_______________________________ ।

६. सा पत्रालयं गत्वा पत्रं प्रेषयति । Sā patrālayam gatvā patram preṣayati.

_______________________________ ।

७. उषा लोकयानस्थानकं गत्वा सख्याः स्वागतं करोति । Uṣā lokayānasthānakam gatvā sakhyāḥ svāgatam karoti.

_______________________________ ।

८. महाभारतं पठित्वा अहं अनेकाः कथाः जानामि । Mahābhāratam paṭhitvā aham anekāḥ kathāḥ jānāmi.

_______________________________ ।

९. भवान् काश्मीरं गत्वा विहारं करोतु । Bhavān Kāśmīram gatvā vihāram karotu.

_______________________________ ।

१०. सः लेखं लिखित्वा पत्रिकासु प्रकाशयति । Saḥ lekham likhitvā patrikāsu prakāśayati.

_______________________________ ।

**32.1**



वैद्यः Vaidyaḥ - किम् अभवत् ? Kim abhavat?

रोगी Rogī - ज्वरः श्रीमन् ! Jvaraḥ śrīman !

वैद्यः - कदा आरभ्य ? Kadā ārabhya ?

रोगी - ह्यः आरभ्य । शिरोवेदना अपि अस्ति । Hyaḥ ārabhya. Śirovedanā api asti.

वैद्यः - आहारः रोचते वा ? Āhāraḥ rocate vā ?

रोगी – आम्, रोचते । Ām, rocate.

वैद्यः – जिह्वां प्रदर्शयतु । भवतु, एतत् औषधम् एताः गुलिकाः च स्वीकरोतु ।
Jihvāṁ pradarśayatu. Bhavatu, etat auṣadham etāḥ gulikāḥ ca svīkarotu.

रोगी – सूच्यौषधं न आवश्यकं वा ? Sūcyauṣadham na āvaśyakam vā ?

वैद्यः – न, एतदेव पर्याप्तम् । Na, etadeva paryāptam.

रोगी – अद्य मया स्नानं कर्तुं शक्यते **किल** ? Adya mayā snānam kartum śakyate kila ?

वैद्यः – शक्यते, **किन्तु** उष्णजलेन करोतु । शीतजलेन मास्तु । यतः भवतः ज्वरः **प्रायशः** शीतकारणतः एव आगतः स्यात् । Śakyate, kintu uṣṇajalena karotu, śītajalena māstu. Yataḥ bhavataḥ jvaraḥ prāyaśaḥ śītakāraṇataḥ āgataḥ syāt.

रोगी – श्रीमन् ! अहं श्वः स्वस्थः भविष्यामि वा ? Śrīman ! ahaṁ śvaḥ svasthaḥ bhaviṣyāmi vā ?

वैद्यः – एतत् औषधं स्वीकरोतु, **निश्चयेन** स्वस्थः भविष्यति भवान् । Etat auṣadham svīkarotu, niścayena svasthaḥ bhaviṣyati bhavān.

रोगी – धन्यवादः । Dhanyavādaḥ.

**किन्तु** Kintu **निश्चयेन** Niścayena **प्रायशः** Prāyaśaḥ **किल** Kila

33.1

## चेत् Cet

| | | | | |
|---|---|---|---|---|
| धनम् | Dhanam | | दानम् | Dānam |
| वृष्टिः | Vṛṣṭiḥ | | सस्यसमृद्धिः | Sasyasamṛddhiḥ |
| निर्वाचनम् | Nirvācanam | | कोलाहलः | Kolāhalaḥ |
| धूमपानम् | Dhūmapānam | चेत् Cet | अनारोग्यम् | Anārogyam |
| सत्कार्यम् | Satkāryam | | कीर्तिः | Kīrtiḥ |
| विद्युत् | Vidyut | | दीपः | Dīpaḥ |
| उपनेत्रम् | Upanetram | | पठति | Paṭhati |
| जलम् | Jalam | | वस्त्रक्षालनम् | Vastrakṣālanam |

एतस्य कोष्ठकस्य साहाय्येन वाक्यानि लिखतु – *Etasya koṣṭhakasya sāhāyyena vākyāni likhatu*

यथा – १. धनम् अस्ति चेत् दानं करोमि । Dhanam asti cet dānam karomi.

२. ________________________________ भवति ।
............... bhavati.

३. ________________________________________ ।
४. ________________________________________ ।
५. ________________________________________ ।
६. ________________________________________ ।

## 33.2 नो चेत् No cet

उदाहरणं दृष्ट्वा तादृशानि त्रीणि वाक्यानि लिखतु - *Udāharaṇam dṛṣṭvā tādṛśāni trīṇi vākyāni likhatu.*

उदा -
१. अवकाशः भवति चेत् आगच्छतु, **नो चेत्** मास्तु ।
Avakāśaḥ bhavati cet āgacchatu, no cet māstu.

२. एतत् वस्त्रम् अल्पमूल्येन ददाति चेत् क्रीणामि, **नो चेत्** न ।
Etat vastram alpamūlyena dadāti cet krīṇāmi, no cet na.

३. भवान् तत्र समये गच्छति चेत् लोकयानं लभ्यते, **नो चेत्** न लभ्यते ।
Bhavān tatra samaye gacchati cet lokayānam labhyate, no cet na labhyate.

४. ________________________________ ।
५. ________________________________ ।
६. ________________________________ ।

## 33.1 यतः Yataḥ

उदाहरणं दृष्ट्वा तदनुगुणं वाक्यानि परिवर्तयतु - *Udāharaṇam dṛṣṭvā tadanuguṇam vākyāni parivartayatu.*

उदा -
१. आरोग्यं सम्यक् नास्ति । **अतः** सः चिकित्सालयं गच्छति ।
Ārogyam samyak nāsti. Ataḥ saḥ cikitsālayam gacchati.

सः चिकित्सालयं गच्छति, **यतः** आरोग्यं सम्यक् नास्ति ।
Saḥ cikitsālayam gacchati, yataḥ ārogyam samyak nāsti.

२. विद्युत् नास्ति । अतः दीपः न ज्वलति । Vidyut nāsti. Ataḥ dīpaḥ na jvalati.
________________________________________ ।

३. अद्य गणेशोत्सवः । अतः विद्यालयस्य विरामः अस्ति ।
Adya Gaṇeśotsavaḥ. Ataḥ vidyālayasya virāmaḥ asti.
________________________________________ ।

४. सम्यक् न पठितवान् । अतः सः परीक्षायाम् अनुत्तीर्णः ।
Samyak na paṭhitavān. Ataḥ saḥ parīkṣāyām anuttīrṇaḥ.

५. संस्कृतं सुलभम् । अतः अहं संस्कृतं पठामि ।
Saṁskṛtam sulabham. Ataḥ aham saṁskṛtam paṭhāmi.

______________________________________ ।

६. उदयनः अन्यां भाषां न जानाति । अतः संस्कृतेन वदति ।
Udayanaḥ anyām bhāṣām na jānāti. Ataḥ saṁskṛtena vadati.

______________________________________ ।

७. तस्य मूल्यम् अधिकम् । अतः तत् वस्त्रं मास्तु ।
Tasya mūlyam adhikam. Ataḥ tat vastram māstu.

______________________________________ ।

## 34.1

शरीरस्य अवयवानां नामानि अत्र सन्ति । तानि उचिते स्थाने लिखतु । *Śarīrasya avayavānāṁ nāmāni atra santi. Tāni ucite sthāne likhatu.*



| | |
|---|---|
| केशाः | Keśāḥ |
| शिरः | Śiraḥ |
| ललाटः | Lalāṭaḥ |
| कर्णः | Karṇaḥ |
| नासिका | Nāsikā |
| मुखम् | Mukham |
| कपोलः | Kapolaḥ |
| कण्ठः | Kaṇṭhaḥ |
| वक्षःस्थलम् | Vakṣasthalam |
| स्कन्धः | Skandhaḥ |
| भुजः | Bhujaḥ |
| अङ्गुली | Aṅgulī |
| नखः | Nakhaḥ |
| पादः | Pādaḥ |
| उदरम् | Udaram |
| कटिः | Kaṭiḥ |

**34.2**

एतान् वर्णान् उपयुज्य शरीरावयवानां १० नामानि लिखतु – *Etān varṇān upayujya śarīrāvayavānām 10 nāmāni likhatu.*

| | | | | |
|---|---|---|---|---|
| पा | ल | का | न | मू |
| सि | पु | ट | क | : |
| ना | उ | ल | ज | ष्ठ |
| ख | ऊ | ला | त्र | र |
| क | पो | टि | ने | द |

१. ललाटः । Lalāṭaḥ   २. ---------- ।
३. ---------- ।   ४. ---------- ।
५. ---------- ।   ६. ---------- ।
७. ---------- ।   ८. ---------- ।
९. ---------- ।   १०. ---------- ।
११. ---------- ।

## 35.1 यः Yaḥ – सः Saḥ, या Yā – सा Sā

उदाहरणं दृष्ट्वा एते के इति लिखतु – *Udāharaṇam dṛṣṭvā ete ke iti likhatu.*

क्रीडालुः Krīḍāluḥ – यः क्रीडति सः क्रीडालुः । Yaḥ krīḍati saḥ krīḍāluḥ.
गायकः Gāyakaḥ – ---------------------------------------- ।
भाषणकारः Bhāṣaṇakāraḥ – ---------------------------------------- ।
चालकः Cālakaḥ – ---------------------------------------- ।
लेखकः Lekhakaḥ – ---------------------------------------- ।
वैद्या Vaidyā – या चिकित्सां करोति सा वैद्या । Yā cikitsām karoti sā vaidyā.
नर्तकी Nartakī – ---------------------------------------- ।
अध्यापिका Adhyāpikā – ---------------------------------------- ।
कार्यकर्त्री Karyakartrī – ---------------------------------------- ।

## 35.2 यत् – तत् Yat - Tat

एतानि वाक्यानि पठतु – *Etāni vākyāni paṭhatu.*

१. मम समीपे यत् पुस्तकम् अस्ति तत् अन्यत्र नास्ति ।
Mama samīpe yat pustakam asti tat anyatra nāsti.

२. विदेशे यत् तन्त्रज्ञानम् अस्ति तत् भारते नास्ति ।
Videśe yat tantrajñānam asti tat bhārate nāsti.

३. अध्यात्मविषये भारतीयानां यत् चिन्तनम् अस्ति तत् अपूर्वम् ।
Adhyātmaviṣaye bhāratīyānām yat cintanam asti tat apūrvam.

*एतादृशानि वाक्यानि लिखतु – Etadṛśani vākyāni likhatu.*

———————— यत् Yat ———————— तत् Tat ———————— ।

———————— यत् Yat ———————— तत् Tat ———————— ।

———————————————————————— ।

———————————————————————— ।

## 36.1 यद्यपि – तथापि Yadyapi - Tathāpi

*अत्र वाक्यद्वयं लिखितम् अस्ति । तत् उदाहरणानुगुणम् एकं वाक्यं कृत्वा लिखतु –*
*Atra vākyadvayaṁ likhitam asti. Tat udāharaṇānuguṇam ekaṁ vākyaṁ kṛtvā likhatu.*

यथा – सः निर्धनः । दानं करोति । Saḥ nirdhanaḥ. Dānaṁ karoti.

**यद्यपि** सः निर्धनः **तथापि** दानं करोति । Yadyapi saḥ nirdhanaḥ tathāpi dānaṁ karoti.

१. मम समयः नास्ति । भवत्याः गृहम् आगच्छामि । Mama samayaḥ nāsti. Bhavatyāḥ gṛhaṁ āgacchāmi.

———————————————————————— ।

२. सः बुद्धिमान् । परीक्षायाम् अनुत्तीर्णः । Saḥ buddhimān. parīkṣāyāṁ anuttīrṇaḥ.

———————————————————————— ।

३. अहं भोजनं न कृतवान् । बुभुक्षा नास्ति । Ahaṁ bhojanaṁ na kṛtavān. Bubhukṣā nāsti.

———————————————————————— ।

४. अहम् अधिकं पठामि । स्मरणे न तिष्ठति ।Ahaṁ adhikaṁ paṭhāmi. smaraṇe na tiṣṭhati.

———————————————————————— ।

५. किञ्चित् कष्टं भवति । अहं योगासनं करोमि । Kiñcit kaṣṭaṁ bhavati. Ahaṁ yogāsanaṁ karomi.

———————————————————————— ।

६. अद्य भानुवासरः विद्यालयस्य विरामः नास्ति । Adya Bhānuvāsaraḥ vidyālayasya virāmaḥ nāsti.

———————————————————————— ।

# कठिनशब्दानां सान्दर्भिकाः अर्थाः

अधिकारी = Officer (पु)
अन्यत्र = Elsewhere (अ)
अवलेहः = Pickle (पु)
आत्मविश्वासः = Selfconfidence (पु)
आपणः = Shop (पु)
आपणिकः = Shopkeeper (पु)
आमलकम् = Gooseberry (न)
आवुत्तः = Sister's husband (पु)
उन्मत्तः = Mad (पु)
उपन्यासः = Lecture (पु)
ऊरुकम् = Trousers (न)
एकत्र = At one place (अ)
कण्ठहारः = Necklace (पु)
कपाटिका = Cup-board (स्त्री)
कर्मकरः = Worker (पु)
कलायः = Groundnut (पु)
कृपया = Please (स्त्री) (तृ.ए.व.)
कृशा = Thin (स्त्री)
क्रीडाङ्गणम् = Playground (न)
क्वथितम् = Sambar (न)
गुडः = Jaggery (पु)
गुलिका = Tablet (स्त्री)
गृहपाठः = Homework (पु)
ग्रन्थालयः = Library (पु)

ग्राहकः = Customer (पु)
ग्राहिका = Customer (स्त्री)
चर्चा = Discussion (स्त्री)
चतुरः = Clever (पु)
चालकः = Driver (पु)
चिकित्सा = Treatment (स्त्री)
जन्मदिनम् = Birthday (न)
जागरितः = Awake (पु)
जामाता = Son-in-law (पु)
तालः = Lock (पु)
तिन्त्रिणी = Tamarind (स्त्री)
त्रिचक्रिका = Auto (स्त्री)
दिनचर्या = Daily work (स्त्री)
दुहिता = Daughter (स्त्री)
दूरवाणीविनिमयकेन्द्रम् = Telephone exchange (न)
देवरः = Husband's younger brother (पु)
दौहित्रः = Grandson (पु)
दौहित्री = Grand daughter (स्त्री)
ध्वनिवर्धकम् = Loud speaker (न)
ननान्दा = younger brother's wife (स्त्री)
नागरिकः = Citizen (पु)
निधानिका = Shelf (स्त्री)
निमीलनम् = Closing of eyes (न)

निर्वाचनम् = Election (न)
पत्रालयः = Post office (पु)
परश्वः = Day after tomorrow (अ)
परह्यः = Day before yesterday (अ)
परिणीतवान् = Married (पु)
पालितपुत्रः = Broughtup son (पु)
पितामहः = Father's father (पु)
पितामही = Father's mother (स्त्री)
पितृव्यः = Father's younger brother (पु)
पितृव्या = Father's younger brother's wife (स्त्री)
प्रतीक्षा = Expectation (स्त्री)
प्रपरश्वः = Day after day after tomorrow (अ)
प्रवासः = Tour (पु)
प्रस्थाय = After setting out (अ)
प्रावारकम् = Coat (न)
फेनकम् = Soap (न)
बुभुक्षा = Hunger (स्त्री)
भागिनेयः = Sister's son (पु)
भागिनेयी = Sister's daughter (स्त्री)
मलिनम् = Dirty (न)
मशी = Ink (स्त्री)
मातामहः = Mother's father (पु)
मातामही = Mother's mother (स्त्री)
मातुलः = Mother's brother (पु)
मातुलानी = Mother's brother's wife (स्त्री)
मूल्यम् = Price (न)
मोदकम् = A sweet dish (न)
यन्त्रागारम् = Factory (न)
लेखः = Article (पु)
लोकयानम् = Bus (न)
वसतिगृहम् = Lodging (न)
वातावरणम् = Atmosphere (न)
विक्रेता = Seller (पु)
वितारकः = Supplier (पु)
वित्तकोशः = Bank (पु)
विद्युत् = Electricity (स्त्री)
विपणिः = Market (पु)
व्यञ्जनम् = Curry (न)
शिरस्त्रम् = Cap (न)
श्लोकः = Verse (पु)
श्वः = Tomorrow (अ)
श्वशुरः = Father-in-law (पु)
श्वश्रूः = Mother-in-law (स्त्री)
सम्मार्जनी = Broom (स्त्री)
सर्वत्र = Everywhere (अ)
सूच्यौषधम् = Injection (न)
सेवकः = Waiter (पु)
स्थानकम् = Station (न)
स्नुषा = Daughter-in-law (स्त्री)
स्वायत्तसंस्था = Private company (स्त्री)
ह्यः = Yesterday (अ)

* * *